एवं शुद्धस्याऽपक्वसेवनस्य प्रकारद्वयम्—

अपक्वं हेम संघृष्टं शिलायां जलयोगतः ।
द्रवरूपं तु तत्पेयं मधुना गुणदायकम् ॥
यद्वापि तवका (वरका) ख्यन्तु स्वर्णपत्रं विचूर्णितम् ।
मधुना संगृहीतं चेत् सद्यो हन्ति विषादिकम् ॥

आ. वे. प्र. अ. ११-३२-३३

स्वर्ण कल्पे तु—

सर्वौषधिप्रयोगैर्ये व्याधयो न विनिर्जिताः ।
कर्मभिः पञ्चभिश्चापि सुवर्णं तेषु योजयेत् ॥
शिलाजतुप्रयोगैश्च ताप्यसूतकयोस्तथा ।
अन्यै रसायनैश्चापि प्रयोगो हेम्न उत्तमः ॥
यववृद्ध्या प्रयोक्तव्यम् ..... ॥ ग. नि. ॥

काश्यप संहितायां च—

विघृष्य धौते दृषदि प्राङ्मुखी लघुनाम्बुना ।
आमथ्य मधुसर्पिर्भ्यां लेहयेत्कनकं शिशुम् ॥
सुवर्णप्राशनं ह्येतन्मेधाग्निबलवर्धनम् ।
आयुष्यं मङ्गलं पुण्यं वृष्यं वर्ण्यं ग्रहापहम् ॥
मासात्परममेधावी व्याधिभिर्न च धृष्यते ।
षड्भिर्मासैः श्रुतधरः सुवर्णप्राशनाद्भवेत् ॥

लेहाध्यायः पृ० ३ ॥ २४९-२५० ॥

अथ स्वर्णमारणम्—

माक्षिकं नागचूर्णञ्च पिष्टमर्करसेन च ।
हेमपत्रं पुटेनैव म्रियते क्षणमात्रतः ॥२५१॥

इत्थं विशुद्धस्य सुवर्णस्य मारणमाह माक्षिक मिति—

लोहानां मारणं श्रेष्ठं सर्वेषां रस भस्मना ।
मूलोभिर्मध्यमं प्राहुः कनिष्ठं गन्धकादिभिः ॥
अरिलोहेन लोहस्य मारणं दुर्गुणप्रदम् ॥ र. र. स. ५-१४ ॥
शिलागन्धार्कदुग्धाक्ताः स्वर्णाद्याः सप्तधातवः ।
म्रियन्ते द्वादशपुटैः सत्यं गुरुवचो यथा ॥ र. इ. चि. ६-२० ॥

शुद्धं माक्षिकं सुवर्णसमं. शुद्धं नागचूर्णसुवर्णषोडशांशमर्करसेनाऽर्कपञ्चाङ्गरसेन तद्दुग्धेन वा पिष्टं-मसृणीकृत मित्यर्थः । तेन कण्टकवेध्य शुद्धं हेम पत्रं प्रलिम्पेत्, ततः शरावसम्पुटे कृत्वा लघुपुटे [त्रिंशद्वनोपलैः] पुटेत् । त्रिवारमिति सम्प्रदायः । पुनस्त्रिवारं नागनिवृत्तये-नवसादरजम्बीररसेन पुटेत् ॥ २५१ ॥

शोधित स्वर्णमाक्षिक चूर्ण तथा शुद्ध सीसे के चूर्ण को आक के रस वा दूध से पीस शुद्ध सोने के कंटकवेध्य पत्रों पर लेप कर एक पुट देने से ही स्वर्ण की भस्म हो जाती है ॥ २५१ ॥

मतान्तरम्—

स्वर्णार्द्धं पारदं दत्वा कुर्यात् यत्नेन पिष्टिकाम् ।
दत्त्वोर्ध्वाधो नागचूर्णं पुटेन म्रियते ध्रुवम् ॥२५२॥

प्रकारान्तरमाह सुशुद्धमिति-सुवर्णेन=समानं सूतं त्रिदिनं मर्दयित्वा सुवर्णषोडशांशमूर्ध्वाधो नागचूर्णं दत्वा पूर्ववत्पुटेत । सुशुद्धमत्रस्वर्णार्द्धमिति पीठिकामत्र पिष्टिकामिति पाठः ॥ २५२ ॥

शुद्ध स्वर्णपत्र शोधित पारद समभाग खरल में डाल यत्नपूर्वक मर्दन कर शराव में आधा ऊपर आधा नीचे स्वर्ण का १६वां भाग शुद्ध सीसे का चूर्ण रखे और बीच मे स्वर्ण की पिष्टी को रख सम्पुट कर पुट दे तो स्वर्ण की भस्म हो जाती है ॥ २५२ ॥

मतान्तरम्—

गलितस्य सुवर्णस्य षोडशांशेन सीसकम् ।
योजयित्वा समुद्धृत्य निम्बुनीरेण मर्दयेत् ॥ २५३ ॥
गोलं कृत्वा गन्धचूर्णं समं दत्त्वाधरोत्तरम् ।
शरावसम्पुटे कृत्वा पुटेत् त्रिंशद्वनोपलैः ।
एवं मुनिपुटैर्हेम नोत्थानं लभते पुनः ॥ २५४ ॥

पुनः प्रकारान्तरमाह गलितस्येति—

मुनिपुटैः सप्तभिर्मृदुपुटैः । नोत्थानं लभते-म्रियतेऽत्यर्थः ।

अत्र र. इ. चि. ।

'पुनः पुटेत्त्रिवारं तन्म्लेच्छतो नागहानये' । ६-२४ ॥ २५३-२५४ ॥

शुद्ध स्वर्ण को पिघलाकर उसका सोलहवाँ भाग शुद्ध सीसा डाल मिल जाने पर नीचे उतार ले और खरल में डाल नीबू के रस से भली प्रकार मर्दन कर गोला बनावे । गोले के समान शुद्ध गन्धक का चूर्ण ले । एक शराव में उस गन्धक को आधा नीचे और आधा ऊपर दें । बीच में गोले को रख दें । दूसरा शराव ऊपर देकर सम्पुट कर दें । इस शराव सम्पुट को तीस जङ्गली उपलों की आग दे । इस प्रकार नीबू के रस से मर्दन

कर गन्धक के साथ सात पुट देने से स्वर्ण भस्म फिर जीवित नहीं होता ॥ २५३-२५४ ॥

मतान्तरम्—

शुद्धसूतसमं स्वर्णं खल्ले कृत्वा तु गोलकम् ।
ऊर्ध्वाधो गन्धकं दत्त्वा सर्वतुल्यं निरुध्य च ॥ २५५ ॥
त्रिंशद्वनोपलैर्दद्यात् पुटान्येवं चतुर्दश ।
निरुत्थं जायते भस्म गन्धो देयः पुनः पुनः ॥ २५६ ॥

लोहानां सरसं भस्म सर्वोत्कृष्टं प्रकल्पयेत् इत्युक्तेः, सूतयोगेनोत्तमं सुवर्णभस्माह—शुद्धेति- कण्टकवेध्यानि शुद्धानि स्वर्णपत्राणि समानमानेन हिंगुलनिसृतपारदेन त्रिदिनं जम्बीररसेन मर्दयित्वा गोलं विधाय । सर्वतुल्यं-पारदसुवर्णतुल्यं शुद्धगन्धकं जम्बीररसेन मर्दितं बहिः प्रलिप्योर्ध्वाधो वा गन्धको देयः । निरुध्य सम्पुटे कृत्वा लघु पुटेत् । द्वितीयपुटादिषु-ईषत्पारदो देयः । बालुकायन्त्रे चेद्रससिन्दूरविधिनाऽस्य पाकः क्रियते तदोपरिस्थं रससिन्दूरमपि कार्यकारि भवति । निरुत्थमपुनर्भवम् । अत्र. आ. वे. प्र.—

अत्रानुक्तमपि ज्ञेयं गोलकीकरणे बुधैः ।
जम्बीरद्रवदानन्तु सर्वत्रैवं विनिश्चयः । ११-६० ।
प्रतिवारं गन्धो जम्बीरद्रवेण मर्दनीयः ॥ २५५-२५६ ॥

शुद्ध पारे के समान शुद्ध स्वर्ण ले खरल में घोट गोला बना दोनों के समान शुद्ध गन्धक ले शराव में ऊपर नीचे आधी आधी गन्धक दे बीच में इस गोले को रख सम्पुट कर दे । फिर मध्यम

प्रमाण तीस जङ्गली उपलों की आग दे । इस प्रकार चौदह पुट देने से निरुत्थ स्वर्णभस्म हो जाता है । इस में प्रत्येक वार गन्धक डालनी चाहिये ॥ २५५-२५६ ॥

अथ शुद्धस्वर्णगुणाः—

कषायतिक्तमधुरं सुवर्णं गुरु लेखनम् ।
हृद्यं रसायनं बल्यं चक्षुष्यं कान्तिदं शुचि ॥ २५७ ॥
आयुर्मेधावयःस्थैर्य-वाग्विशुद्धिस्मृतिप्रदम् ।
क्षयोन्मादगराणाञ्च कुष्ठानां नाशनं परम् ॥ २५८ ॥

(इति स्वर्णमारणम्)

सुवर्णस्य गुणानाह—कषायेति-कषायं तिक्तं मधुर मिति रसत्रययुतमित्यर्थः । गुर्विति—सर्वधात्वपेक्षयेत्यर्थः । हृद्यमिति-हृदयाय हितं हृद्यम् । चक्षुष्यं-चक्षुषे हितम् । कान्तिदं-सौन्दर्यकरम् । आयुः-शरीरेन्द्रियसत्वात्मसंयोगः । मेधा-धारणा शक्तिः । वयस्थैर्य-वयोदार्ढ्यकरम् । वाग्विशुद्धिः-अस्पष्टवाङ्निवर्त्तकम् । स्मृतिः-स्मरणम् । क्षयेति-क्षये गण्डमालायां च विशेषतः प्रयुज्यते । एवमान्त्रक्षये फिरङ्गतृतीयावस्थायामपि ज्ञेयम् । उन्मादेति-अपस्मारापतन्त्रकादि मानसरोगाणामुपलक्षणम् । गरः=कृत्रिमविषम् । परमिति प्रयोगो हेम्न उत्तम इत्युक्तेः ।

अत्र—एतद्भस्म सुवर्णजं कटुघृतोपेतं द्विगुञ्जोन्मितम् ।
लीढं हन्ति नृणां क्षयाग्निसदनं श्वासं च कासारुचिम् ॥
ओजो धातुविवर्धनं बलकरं पाण्ड्वामयध्वंसनम् ।

३८। र. का. धे. धातु संग्रह पादे २ ॥ २५७-२५८ ॥

॥ इत्यानन्दी टीकायां सुवर्णाधिकारः ॥

स्वर्ण भस्म कसैला, तिक्त, मधुर, भारी, लेखन, हृदय के लिये हितकारी, रसायन, बलदायक, चक्षुहितकारी, कान्तिदायक, पवित्र होता है। स्वर्ण आयु, मेधा, वयस् की स्थिरता, वाणी की शुद्धि और स्मृति का भी देने वाला है। क्षयरोग, उन्माद, गरविष तथा कुष्ठरोगों का परम नाशक है। मा. ¼ र० ॥ २५७-२५८ ॥

अथ शुद्धरजतलक्षणम्—

दग्धोत्तीर्णं सुशीतं यन्निर्मलं कुंदसन्निभम् ।
गुरु स्निग्धं कुमारञ्च तारमुत्तममिष्यते ॥२५९॥

रजतलक्षणमाह दग्धेति—

रजतस्य सुवर्णस्य च दलानि क्रियन्ते तानि च पर्णवीटिकानां मिष्टान्नादीनां च बहिरप्याव्रियन्ते, औषधादिषु च प्रयोगे प्रोक्तफलानि भवन्ति। दग्धोत्तीर्णमिति दग्धञ्च तदुत्तीर्णं दग्धोत्तीर्णम्=अग्नितापित मित्यर्थः तदनु सुशीतं शीतीकृतं सत् यन्निर्मलं मलशून्यमत एव कुन्दसन्निभं=कुन्दपुष्पसदृशशुभ्रं, शीतकाले हि कुन्दपुष्पाणि जायन्ते, अत एव कुन्दस्य माघे भवं माघ्यमिति पर्य्यायान्तरम्। गुरु=गौरवयुतं, कुमारं=मृदु-एवंविधं तारं=सौप्यमुत्तममौषधप्रयोगार्हम् भवति

रसार्णवे तु-शुक्लं च तारं कृष्णं च द्विविधं रजतं प्रिये। ७-१०३। अत्र तारकृष्णं महारजतम् Platinum प्लाटीनम इति भा. र. शा. पृ. ४४१ ॥ २५९ ॥

चांदी अग्नि में दग्ध करने के पश्चात् शीतल होने पर कुन्द फूल के समान श्वेत एवं निर्मल हो, तथा जो भारी चिकनी और मुलायम हो वह उत्तम होती है ॥ २५९ ॥

अथ अशुद्धरजतदोषाः—

आयुः शुक्रं बलं हन्ति रोगसङ्घं करोति च ।
अशुद्धञ्चामृतं तारं शुद्धं माघ्यं मतो बुधैः ॥२६०॥

अशोधितरजतस्य दोषानाह—आयुरिति—रोगसङ्घं=रोगसमुदायम्। अशुद्धं चामृतमिति=अशुद्धं मृतमपि न योज्यम्। अपि च—घनं स्निग्धं मृदु स्वच्छं दाहे छेदे सितं गुरु।
शङ्खाभं मसृणं स्फोटरहितं रजतं शुभम् ॥
दाहे रक्तं च पीतं च कृष्णं रूक्षं स्फुटं लघु।
स्थूलाङ्गं कर्कशाङ्गं च रजतं त्याज्यमष्टधा ॥
। र. इ. चू. १४-२९-३० ।

शुद्धरजतस्य तनुतराणि पत्राणि सूत्राणि च भवन्ति। नाऽशुद्धस्य।

उक्त गुणोपयुक्तं दोषरहितं च बुधै रसशास्त्रकुशलैः माघ्यं=भस्मीकरणार्थं योज्यम् ॥ २६० ॥

अशुद्ध तथा भलीभांति भस्म न किया चांदी आयु, वीर्य तथा बल का नाश करता है और अनेक रोगों का कारण होता है।

---

१ ताम्रयोगश्चेद्रजते शलाकया शोरकाम्लस्य बिन्दुक्षेपेण नीलहरितं चिह्नं भवति। रजतखनिस्तु बर्मा, मैक्सीको, पेरू, नार्वे, आष्ट्रेलिया दिषु, भारते च तत्र तत्राल्पमानेन लभ्यते।

इसलिये चांदी को शुद्ध करके ही मारना चाहिये ॥ २६० ॥

अथ रजतशोधनम्—

नागेन क्षारराजेन द्रावितं शुद्धिमृच्छति ।
रजतं, दोषनिर्मुक्तं किंवा क्षाराम्लपाचितम् ॥ २६१

(इति रजतशोधनम्)

रजतशोधनमाह नागेनेति—तारं हि भूमौ केवलं तारमेवोत्पद्यते, अन्यत्र गन्धेन सहैकीभूतं तदन्यत्र सुवर्णशीसकादिभिर्मिलितं प्राप्यते। यच्च शुद्धं लभ्यते तस्य क्षाराम्लपाचनाच्छुद्धिः । यत्र च धात्वन्तर संसर्गः तत्रनागेन=शीशकेन, क्षारराजेन=टङ्कणेन रजतसमानमानेन द्रावितं=मूषायां ध्मापितं शुद्धिमृच्छति=गच्छति । जातसीसक्षयं यावत् धमेत्तावत्पुनः पुनरित्युक्तेः । टङ्कणेन सह मूषायामतिशय-धमनात् नागो विलयं याति धात्वन्तरससर्गश्च नश्यति । सम्प्रति तु रजतविक्रेतॄणां (सराफ) विपणिषु 'नम्बरी चांदी' इति नाम्ना यल्लभ्यते तदेव मारणयोग्यम् ॥ २६१ ॥

चांदी को सीसा तथा सुहागे से मिलाकर पिघलावें तो शुद्ध हो जाती है। अथवा क्षार और अम्ल में पकाने से भी चांदी दोषरहित हो जाता है ॥ २६१ ॥

अथ रजतमारणम्—

माक्षिकं गन्धकञ्चैवमर्कक्षीरेण मर्दयेत् ।
तेन लिप्तं रूप्यपत्रं पुटेन म्रियते ध्रुवम् ॥ २६२ ॥

---

१ पूर्वार्धोऽस्य रसार्णवेऽपि दृश्यते । ७-१०४ ।

रजतमारणमाह— माक्षिकमिति—शुद्धं माक्षिकं गन्धकं च अर्कक्षीरेण मसृणं मर्दयेत् तेन रूप्यपत्रं कर्त्तव्यं सूक्ष्मरूपेण कर्तितं चूर्णं वा लिप्तं मिश्रितं वा शरावसम्पुटे पुटेन त्रिशद्वनोपलपुटेन—स्वर्णरूप्यवधे ज्ञेयं पुटं कुक्कुटकादिकम् ।

ताम्रे काष्ठादिजो वह्निर्लोहे गजपुटानि च ॥ इत्युक्तेः पुटनप्रयोजनञ्च—रसादिद्रव्यपाकानां प्रमाणज्ञापनं पुटम् ।

नेष्टो न्यूनाधिकः पाकः सुपाकहितमौषधम् ॥
पुटनात् स्याल्लघुत्वं च शीघ्रव्याप्तिश्च दीपनम् ।
जारितादपि सूतेन्द्राल्लोहानामधिको गुणः ॥

आ. वे. प्र. ११-४४. ४६ ।

माक्षिकयोगादिदं यकृत्प्लीहादिषु विशेषेण योज्यम् ॥ २६२ ॥

स्वर्णमाक्षिक गन्धकचूर्ण सम भाग दोनों को आक के दूध से मर्दन कर शुद्ध चांदी के पत्तों पर लेप कर शराबसम्पुट में रख पुट दे। इसप्रकार पुट देने से चांदी की भस्म हो जाती है ।

पुनः पुटें देने में माक्षिक न डालें और केवल गन्धक से ही पुटें दें ॥ २६२ ॥

मतान्तरम्—

कण्टवेध्ये तारपत्रे दत्त्वा द्विगुणहिङ्गुलम् ।
पातयन्त्रे रसो ग्राह्यो रजतं मृतमुच्यते ॥ २६३ ॥

हिंगुलयोगेन सर्वोत्तमं तारभस्माह-कण्टवेध्ये इति-कण्टवेध्ये=कण्टकेन वेधनयोग्ये तारपत्रे-रौप्यपत्रे रौप्यद्विगुणं हिंगुलं दत्त्वा

केनचिदम्लेन मर्दयित्वा च पातयन्त्रे-ऊर्ध्वपातनयन्त्रे रससिन्दूरवत् वालुकायन्त्रे पाकं कृत्वा रस ऊर्ध्वलग्नो ग्राह्यः। अधस्थं रजतं त्रिः पुनरपि पुटनीयम् ॥ २६३ ॥

कांटे से बींधने योग्य पतले चांदी के पत्र बना उसमें दुगुना हिंगुल मिला ऊर्ध्वपातन-यन्त्र में पकावे। ऐसा चार पांच बार करे। नीचे चांदी की भस्म मिलेगी। ऊपर के पात्र में पारा मिलेगा ॥ २६३ ॥

मतान्तरम्—

तालं गन्धं रौप्यपत्रं मर्दयेत् निम्बुकद्रवैः।
त्रिपुटैश्च भवेद्भस्म योज्यमेतद्रसादिषु ॥ २६४ ॥

प्रकारान्तरेण रोगविशेषे गुणकरं रजतभस्माह तालमिति—शुद्धं तालं गन्धं च रौप्यमानं निम्बुकरसेन मसृणं मर्दयित्वा तत्र रौप्यपत्रं चूर्णं वा दत्त्वा शरावसम्पुटे त्रिशद्वनोपलैः त्रिः पुटेत्। एतद्भस्म च रसादिषु जयमङ्गलवृहद्वातगजांकुशादिषु योज्यम्। निम्बुकद्रवैरित्यम्लस्योपलक्षणम्।

एतदेव स्पष्टीकृतं यथा—

विधाय पिष्टिं सूतेन रजतस्याथ मेलयेत्।
तालं गन्धं समं पश्चान्मर्दयेन्निम्बुकद्रवैः ॥
द्वित्रैः पुटैर्भवेद्भस्म योज्यमेतद्रसादिषु।

सूतेन-समेनेत्यर्थः। अत्र सूतरक्षार्थं गन्धः पुनः पुनरधिको देयः।

र. इ. चि. ६. ३० ॥ २६४ ॥

शुद्ध हड़ताल, शुद्ध गन्धक, शुद्ध चांदी के पत्र, तीनों समभाग ले नीबू के रस से मर्दन कर तीन पुट दे। इससे चाँदी का भस्म हो जाता है। इसे सब रसादिकों में वर्ते ॥ २६४ ॥

मतान्तरम्—

तारपत्रं चतुर्भागं भागैकं शुद्धतालकम्।
मर्द्यं जम्बीरजैर्द्रावैस्तारपत्राणि लेपयेत् ॥ २६५ ॥
रुध्वा त्रिभिः पुटैः पाच्यं पञ्चविंशद्वनोपलैः।
म्रियते नात्र सन्देहो गन्धो देयः पुनः पुनः ॥ २६६ ॥

किञ्च—तारपत्रमिति—तालकं जम्बीरद्रवेण विमर्द्य तेन तारपत्राणि लेपयेत्। शरावे च तारपत्राणामुपर्यधः तारमानं गन्धं दत्त्वा 'गन्धो देयः पुनः पुनः' इति गमकात्। सम्पुटं रुध्वा त्रिः पुटेत्। तालं तु प्रथमवारमेव देयम्। यद्यपि केवलगन्धकयोगेनापि तारभस्म सम्पद्यते तालादियोगस्तु विशेषगुणाधानाय ॥ २६५-२६६ ॥

शुद्ध चांदी के पत्र चार भाग, शुद्ध हड़ताल एक भाग। हड़ताल को जम्बीरी के रस से घोट चाँदी के पत्रों पर लेप कर शुष्क होने पर पत्रों को शराव सम्पुट में रख २५ जङ्गली उपलों की आग दे। इस प्रकार तीन पुट देने से चांदी की भस्म हो जाती है। गन्धक प्रत्येक बार देना चाहिये ॥ २६५-२६६ ॥

अथ शुद्धरजतगुणाः—

शीतं कषायं मधुरमम्लं वातप्रकोपजित्।
दीपनं बलकृत् स्निग्धं गुल्माजीर्णविनाशनम्।

आयुष्यं दीर्घरोगघ्नं रजतं लेखनं स्मृतम् ॥ २६७ ॥

(इति रजतमारणम्)

शुद्धस्य मृतस्य च तारस्य गुणानाह-शीतमिति-शीतत्वाद् गुटिकाऽस्य धृता वक्त्रे तृष्णाशोथविनाशिनी । आ. वे. प्र. ११-८४. । कषायं-कषायस्वादम् । मधुरमम्लं चेतित्रयोरसास्तारे । वातप्रकोपजित् इति पंगुकलायखञ्ज गृध्रसीध्वजभङ्ग, शुक्रदोषउरःपीड़ादिषु-अस्य विशेषेणोपयोगो भवति । वातघ्नमहालक्ष्मीविलासादावप्यस्योपयोगोस्ति । बलकृद्=बल्यम् । गुल्माजीर्णविनाशनम् गुल्मेति-यकृत्प्लीहादीनामप्युपलक्षणम् । अजीर्णे-यवानिकालवङ्गचूर्णेन देयम् ।

आयुष्यम्=आयुषे हितम् । दीर्घरोगघ्नम्=रजतयोगसाध्या ये दीर्घा-जीर्णा रोगास्तत्तद्रोगहारानुपानेन तान् हन्ति इत्यर्थः । यथा क्षयजश्वासक्लेशे रजतयोगात्काञ्चनाभ्रं प्रदीयते ।

यत्तु-रसपद्धति टीकायां-'अपक्वरजतं नैव योज्यं···'श्वेतकुष्ठकरं च तत् इत्युक्तं तत्प्रायिकम् । मिष्टान्नमोदकादिषु रजतपत्राणां बहुप्रयोगदर्शनात् । प्रमेहे विशेषत उष्णवाते फिरङ्गरोगे सुवर्णमिव चमत्करोति । स्निग्धं सरं वमनकरं वयःस्थापकं प्रमेहहरं वातपित्तनाशकं च । गन्धकयोगेन साधितमस्य भस्म कृष्णवर्णं तत्र शतभागे ८४ भागा रौप्यस्य १६ भागा गन्धस्याप्यवशिष्यन्ते । मात्रा ¼-½ र. ॥ २६७ ॥

शुद्ध चांदी का भस्म शीतल कसैला मधुर खट्टा होता है। वायु के प्रकोप को जीतता है। दीपन और बलदायक है, स्निग्ध

है, गुल्म तथा अजीर्ण का विनाशक है, आयुवर्धक है, दीर्घकाल से उत्पन्न रोगों को नाश करता है। लेखन है मात्रा आधी रत्ती से एक रत्ती ॥ २६७ ॥

अथ अशुद्धताम्रदोषाः—

न विषं विषमित्याहुस्ताम्रन्तु विषमुच्यते ।
एको दोषो विषे त्वष्टौ दोषास्ताम्रे प्रकीर्त्तिताः ।२६८।
भ्रमो मूर्च्छा विदाहश्च उत्क्लेदशोषवान्तयः
अरुचिश्चित्तसन्ताप एते दोषा विषोपमाः
तस्माद्विशुद्धं ताम्रं हि ग्राह्यं रोगोपशान्तये ॥२६९॥

क्रमप्राप्तं ताम्रमाह[1]-न विषमिति-तच्च द्विविधं नेपाल म्लेच्छभेदात् तत्र म्लेच्छं धात्वन्तरसंयोगात् कृष्णं कठिनम् । अपि च-

कृष्णं रूक्षमतिस्तब्धं श्वेतं चापि घनासहम् ।
लोहनागयुतं शुल्वं म्लेच्छं दुष्टं मृतौ त्यजेत् ॥

ग्राह्यं तु--जपाकुसुमसङ्काशं स्निग्धं मृदु घनक्षमम् ।
लोहनागोज्झितं ताम्रं नेपालं मृत्यवे शुभम् ॥

आ. वे. प्र. ११-१०७ ।

अपि च--शुकतुण्डकिंशुकाभं छेदे रक्तं तथा मृदुस्निग्धम् । तापे भवति न कृष्णं तच्छुल्वं कालिकारहितम् । र.का.धे. प्रा.२-३१९

इदञ्च ज्ञेयम्—चाकचक्ययुतातिशोणस्य ताम्रस्य घनघातेन पत्राणि, आकर्षणेन सूत्राणि च भवन्ति तापविद्युद्वाहकता च ।

१. अथर्ववेदे तु ताम्रस्य लोहितमय लोह इति नाम दृश्यते ।

ताम्रखनिस्तु कूर्माद्रिपर्वतस्य (कुमायूं) गंगोली प्रदेशे-रांई का लड़ा इत्याख्ये, एवं विहारप्रदेशस्य सिंहभूम, हजारीबाग मण्डले चास्ति। स्वर्णमाक्षिकात् तुत्थाच्चास्योत्पत्तिर्भवति।[1]

विषं न विषं ताम्रं तु विषमिति--विषापेक्षया ताम्रस्य बहुदोषकरत्वमेतेन प्रतिपादितम्। अतिमात्रसेविते विषे-एक एव मारणात्मको दोषः, अशुद्धामृततामे तु भ्रमादयोऽष्टौ दोषाः-अतश्चिकित्सकैस्ताम्रस्य शोधनं मारणञ्च सावधानतया कर्त्तव्यमिति भावः। अतिमात्रया सेविते-अशुद्ध भस्म प्रयोगे च भ्रमादिषु शीतलं खण्डदुग्धसेवनं शीतलजलेन स्नानं प्रत्यहं कोष्ठशुद्धिस्त्रिफलादिना, गन्धकगुडूचीसत्वयोगश्च धारोष्णदुग्धेन। एवं सप्तदिनाभ्यन्तरे भ्रमादयोऽपगच्छन्ति। अन्येषां वमनविरेकविदाहक्लमस्वेदोत्क्लेशादीनां स्वं स्वं चिकित्सितम्॥ २६८-२६९॥

विष नाम से प्रसिद्ध द्रव्य विष नहीं हैं। परन्तु तांबा विष है। क्योंकि विष में तो एक ही दोष होता है परन्तु तांबे में आठ दोष हैं॥ २६८॥

भ्रम, मूर्च्छा, विदाह, देह का गीलापन, शोष, वान्ति, अरुचि, चित्तसन्ताप ये विषों के समान आठ दोष ताम्र में रहते हैं। अतएव रोगों की शान्ति के लिए विशुद्ध तांबा ही लेना चाहिए॥ २६९॥

---

१. तुत्थात्ताम्रनिश्कासन प्रकारस्तु तुत्थप्रकरणे प्रोक्तः।

अथ ताम्रशुद्धिः—

पटुना रविदुग्धेन ताम्रपत्राणि लेपयेत्।
अग्नौ सन्ताप्य निर्गुण्डीरसे सिञ्चेत् पुनः पुनः॥२७०॥

तस्य शोधनमाह पटुनेति---पटुना-सैन्धवेन, रविदुग्धेन-अर्कदुग्धेन तत्पत्रस्वरसेन वा, कण्टकवेध्यानि ताम्रपत्राणि सूत्राणि चूर्णं वा लिप्तानि-मिश्रितानि वा-अग्नौ सन्ताप्य निर्गुण्डी रसे क्वाथे वा सप्तवारं सिञ्चेत्॥ २७०॥

सेंधानमक आक का दूध दोनों को मिला तांबे के पत्तों पर लेप करे। पत्रों को अग्नि में सन्तप्त कर सात बार निर्गुण्डी के रस में बुझावे। तांबा शुद्ध होता है॥ २७०॥

मतान्तरम्—

गोमूत्रेण पचेद्यामं ताम्रपत्रं दृढाग्निना।
शुध्यते नात्र सन्देहो मारणञ्चात्र कथ्यते॥ २७१॥

(इति ताम्रशोधनम्)

प्रकारान्तरेण शोधन माह गोमूत्रेणेति--त्रिदिनं लवणलिप्तं ताम्रपत्रं यामंप्रहरमात्रं दृढ़ाग्निना-तीव्राग्निना पचेत्। ताम्रस्य शुद्धिः स्यात्॥ २७१॥

उत्तम ताम्रपत्रों को गोमूत्र में एक पहर तक तीव्र आंच से पकावें। इस से निःसन्देह तांबा शुद्ध हो जाता है। आगे मारने की विधि लिखते हैं॥ २७१॥

अथ ताम्रमारणम्—

सूतमेकं द्विधा गन्धं यामं मर्द्यन्तु कन्यया।

द्वयोस्तुल्यं ताम्रपत्रं लिप्त्वा स्थाल्यां निरोधयेत् ॥२७२॥

सम्यक्शूरणजैः सार्द्धं पार्श्वे भस्म निधाय च ।

चतुर्यामं पचेच्चुल्ल्यां पात्रपृष्ठे सगोम

जलं पुनः पुनर्देयं स्वाङ्गशीतं विमर्दयेत् ।

म्रियते नात्र सन्देहः सर्वरोगेषु योजयेत् ॥ २७४ ॥

ताम्रस्य मारणमाह-सूतमिति—द्विधा गन्धं पारदस्यैको भागो गन्धस्य भागद्वयं कन्यारसेन प्रहरमेकं मर्दयित्वा तेन ताम्रपत्राणि लिप्त्वा सूरणजैः खण्डैश्चूर्णैर्वा सार्धं=सह स्थाल्यां सम्यग्निधाय पार्श्वे च तस्य सति सम्भवे चिञ्चात्वग्भस्म साधारणभस्म वा पूरयेत्। मुखं च स्थाल्या स्थालीमुखप्रवेशयोग्यपरिणाहपात्रेण पिधाय चतुर्यामं चुल्यां पचेत्। पात्रपृष्ठे=स्थालीमुखस्थपात्रपृष्ठे सगोमये गोमयेनालवालं विधायेत्यर्थः। तत्र पुनः पुनः जलं देयम्। उष्णं हेयम्। शीतजलार्द्रीकृतवस्त्रं वा देयम्। स्वाङ्गशीतं=चुल्यामेव क्रमेण स्वयं शीतम्। निधापयेत्--शूरणजैः, रोगेषु अत्र क्रमेण रोधयेत्, मृल्लवणैः, योगेषु, इति पाठान्तराणि। शूरणयोगेन सहैवाऽमृतीकरणमपि भवत्यतः सर्वयोगेषु योजयेदित्युक्तम् ।

॥ २७२-२७४ ॥

पारद १ भा० गन्धक २ भा० की कज्जली को १ प्रहर घीक्वार के रस से मर्दन कर ३ भाग ताम्रपत्रों में लेप कर सूख जाने पर हांडी के भीतर तले में रख करके ऊपर सूरण के छोटे छोटे टुकड़े भर शूरण के चारों तरफ राख भर दे। फिर हाँडी के मुख

प्रवेश योग्य मुख वाली अन्य हाँडी से ढक्कन दे मुख बन्द कर आग में चार पहर पाक करे। पाक समय ऊपर की हांडी के ऊपर तल में गोबर से बाड़ बना ठण्डा जल बार बार दे गरम निकालता जाय स्वाङ्ग शीतल होने पर महीन पीस ले। यह ताम्रभस्म शूरण के साथ चार प्रहर योग होने से अमृतीकृत हो गई। इसको सब प्रयोगों में दे ॥ २७२-२७४ ॥

मतान्तरम्—

जम्भाम्भसा सैन्धवसंयुतेन सगन्धकं स्थापयशुल्बपत्रम् ।

पङ्कायमानं पुटयेत्सुयुक्त्यावान्त्यादिकंयावदुपैति शान्ति २७५

प्रकारान्तरेण मारणमाह जम्भाम्भसेति—ताम्रतुल्यं गन्धकं सैन्धवं च जम्भाम्भसा=जम्बीरफलरसेन मर्दयित्वा तेन शुल्वपत्रं=ताम्रपत्रं विलिप्य तच्च ताम्रपत्रं पङ्कायमानमेव स्थालिकातले निधाय शरावेणाच्छाद्य ततस्तदुपरि वालुकां दत्त्वा यामचतुष्टयं विपचेत् । ततश्चूर्णयित्वा दधिक्षीर-घृतगोमूत्रगोमयरसेन पञ्चागव्यारव्येन यावद्वान्तिभ्रान्तिकरत्वमपगच्छेत् तावत्पुटेदिति सम्प्रदायः। पङ्कायमानमिति लिप्तं ताम्रपत्रं सूत्रं ताराणि वा आर्द्रावस्थायामेव स्थाल्यां स्थापयेदिति पङ्कायमानशब्दार्थः । अथवा वान्त्यादि दोषनिवृत्यर्थं शूरणक्वाथेन मर्दयित्वा गोलं विधाय शूरणान्तः कृत्वा बहिः पङ्केनालिप्य गजपुटे पचेत् शूरणक्वाथमर्दनपुटदानेनापि वान्त्यादिरहितं भवति। ताम्रभस्मकरणे हि प्रकृत्यैव तत्र तुत्थमपि किञ्चिज्जायते ऽतस्तत् (ताम्रभस्म) जलेन प्रक्षालनीयं

यावन्नीलजलदर्शनम्, वान्तिभ्रान्तिरहितं भवति । पङ्कायमान-मत्र पक्वायमान मिति पाठोऽपपाठः ॥ २७५ ॥

सैंधानमक गन्धक ताम्रसमान ले जम्बीरी नीबू के रस से घोट ताम्रपत्रों पर लेप कर गोला ही युक्ति पूर्वक पुटपाक करे। पुनः जबतक वान्ति भ्रान्ति आदि दोष दूर न हों तब तक पूर्वोक्त विधि से पुट दे ॥ २७५ ॥

मतान्तरम्—

शुद्धं ताम्रदलं विमर्द्य पटुना क्षारेण जम्बीरजै-
र्नीरैर्घस्रमिदं स्नुगर्कपयसा लिप्तं धमेत् सप्तधा ।
निर्गुण्ड्यम्बुहिमं रसेन्द्रकलितं दुग्धाज्यगन्धेन तत्
तुल्येनाथ मृतं भवेत् सुपुटितं पञ्चामृतेन त्रिधा ॥२७६॥

रसयोगेनोत्तमं ताम्रभस्माह—शुद्धमिति—शुद्धं ताम्रदलं पटुना क्षारेण जीम्बीरजैर्नीरैर्घस्रं विमर्द्य-इदं स्नुगर्कपयसा लिप्तं निर्गुण्ड्यम्बुहिमं सप्तधा धमेत्। अथ रसेन्द्रकलितं तत् तुल्येन दुग्धाज्यगन्धेन त्रिधा पञ्चामृतेन सुपुटितं मृतं भवेदित्यन्वयः। पटुना क्षारेणेत्यत्र जातावेकवचनम्। तेन यथालाभमिलितैर्लवणै-स्त्रिक्षारैश्च यद्वा पटुना सैन्धवेन क्षारेण=यवक्षारेण, जम्बीरजै नीरै=जलैर्घस्रमेकं दिनम् अत्यन्तसंयोगे द्वितीया। विमर्द्य-इदं विमृदितं स्नुगर्कपयसा स्नुहीदुग्धेन-अर्कदुग्धेन च लिप्तं निर्गुण्ड्यम्बुहिमं निर्गुण्डीरसे क्वाथे वा हिमं सिक्तमित्यर्थः सप्तधा सप्तवारं धमेत् । अथ सप्तवारनिर्गुण्ड्य-

पूर्वप्रक्रियया—पूर्वश्लोकोक्तसंस्तरप्रक्रियया।

ब्रह्मदण्डीस्वरसेन पुटनाद्रक्तवर्णं भवति ताम्रभस्म।

अथ सोमनाथीय ताम्रम्—

शुल्वतुल्येन सूतेन वलिना तत्समेन च।
तदर्धांशेन तालेन शिलया च तदर्धया॥
विधाय कज्जलीं श्लक्ष्णां भिन्नकज्जलसंनिभाम्।
यन्त्राध्यायविनिर्दिष्ट गर्भयन्त्रोदरान्तरे॥
कज्जलीं ताम्रपत्राणि पर्यायेण विनिक्षिपेत्।
प्रपचेद्यामपर्यन्तं स्वाङ्गशीतं समुद्धरेत्॥

अस्य गुणाः—

तत्तद्रोगहरानुपानसहितं ताम्रं द्विवल्लोन्मितम्।
संलीढं परिणामशूलमुदरं शूलं च पाण्डुज्वरम्॥
गुल्मप्लीह यकृत्क्षयाग्निसदनं मेदश्च मेहामयम्।
दुष्टां संग्रहणीं हरेद्ध्रुवमिदं तत्सोमनाथाभिधम्॥

॥ र. का. धे.॥

स्वकृतसरलताम्रभस्म प्रकारः—ताम्रस्य तनूनि पत्राणि सूत्राणि[1] वा काचपात्रे ताम्रार्धगन्धकचूर्णेन मेलयित्वा निम्बूकरसेना प्लाव्याऽतपे प्रत्यहमालोडयन्नासप्तदिनं स्थापयेत् ततो गलितं ताम्रं शूरणकाथै स्त्रिः पुटेत्।

चक्रिकाः शूरणस्यान्तः खाते संस्थाप्य बहिर्मृदावलिप्य गजपुटदानाद्वा वान्त्यादिकं न करोति॥ २७६॥

१. सूत्राणि तु शुद्धस्य ताम्रस्यैव भवन्ति न तत्र धात्वन्तरसंसर्गः।

शुद्ध तांबे के पत्रों को नमक क्षार तथा जम्बीरी के रस से एक दिन मर्दन कर थोहर और आक के दूध से लिप्त कर आग में धौंकनी से तपा कर संभालू के रस में सातवार बुझाने के बाद ताम्र पत्र के समान शुद्ध पारा ले और उसके साथ मर्दन करे। पश्चात् तांबे के समान गन्धक के साथ घोटे। फिर गौ का दूध और घी पृथक् तांबे के समान ले मर्दन करे। जब सूख जाय तब पुट दें। इस प्रकार जब भस्म हो जाय तो तीन पुट पञ्चामृत से दे। यह ताम्र की निर्दोष भस्म होती है॥ २७६॥

अथ शुद्धताम्रगुणाः

वान्तिभ्रान्तिविवर्जितं क्षयरुजाकुष्ठानि पाण्ड्वामयँ
शूलं मेहगुदाङ्कुरानिलगदानुक्तानुपानै र्जयेत्।
गुञ्जामात्रमिदं ततो द्विगुणितं तच्छुद्धकायेन चेत्
भुक्तं स्थौल्यजराऽपमृत्युशमनं पथ्याशिना वत्सरात्॥ २७७॥

(इति ताम्रमारणम्)

ताम्रभस्म सूक्ष्मकृष्णवर्णं जले न विलीयते किन्तु वारिणि हंसवत्तरति।

ताम्रस्य प्रकारविशेषः—

पलोन्मितस्य शुल्वस्य सूक्ष्म पत्राणि कारयेत्।
तत्समं गन्धकं दत्त्वा खल्वे सर्वं विनिक्षिपेत्॥

का संशोधन कर एक रत्ति से क्रमशः दो रत्ति तक बढा पथ्य सहित एक वर्ष तक सेवन किया जाय तो स्थूलता, बुढ़ापा और अकाल मृत्यु दूर होते हैं ॥ २७७॥

ताम्रमुष्णं गरहरं यकृत्प्लीहोदरापहम् ।
क्रिमिशूलामवातघ्नं ग्रहण्यर्शोऽम्लपित्तजित् ॥२७८॥

पुनरपि गुणानाह-ताम्रमिति—उष्णमिति उष दाहे, ओषति=दहतीति उषेः कर्तरि 'इणसिञ्' इत्यादिना नक्। यकृत्प्लीहोदरापहं=वृद्धे यकृति प्लीहि च मृदु यकृद्विरेचनेन त्रिफलादिना प्रयुक्तं चमत्करोति। गुल्मे च एकगुञ्जामात्रया पर्णपत्ररसेन। अम्लपित्तजित् इति धात्रीचूर्णानुपानेन अम्लपित्ते प्रयोज्यम्।

रसायनं, रक्तजननं, जीवाणुनाशकं, श्वासहरं, सङ्कोचकृत्, अल्पमात्रया हृद्यम्, अधिकमात्रया उभयतो दोषहरम्। आमाशयस्य अन्त्राणाञ्च श्लैष्मिककलया शोषितं सूक्ष्मरूपेण, विशेषेण यकृति प्लीहि वृक्कयोश्चाल्पमात्रया दृश्यते। यकृतो वृक्काभ्यां, लालया अन्त्रग्रन्थिभ्यश्च बहिर्निर्गच्छति। मात्रा ½-¼ र.। वमनार्थं १० र. मात्रया मधुना युज्यते। स्वच्छन्दभैरव, सूर्यावर्त्त, हृदयार्णव, पञ्चानन रसादिषु युज्यते। ताम्रस्य विशेषगुणानुपानानि च ग्रन्थान्तरेभ्यो ज्ञेयानि ॥ २७८ ॥

इति ताम्रम्

ताम्रभस्म गरम है, कृत्रिम विष को दूर करता है, जिगर वा तिल्ली को दूर करता है। क्रिमि शूल, आमवात, ग्रहणी, बवासीर और अम्लपित्त को दूर करता है ॥ २७८ ॥

अथ पित्तलकांस्ययोः शोधनादिकम्-

पित्तलञ्च तथा कांस्यं ताम्रवन्मारयेत् पृथक्।
ताम्रवच्छोधनं तेषां ताम्रवद् गुणकारकम् ॥२७९॥

[इति पित्तलकांस्यशोधनमारणम्]

ताम्रप्रभवत्वात् पित्तलकांस्ये-आह-पित्तलमिति—ताम्रस्य भागद्वयमेको भागो यशदस्य द्वयं मिलितं पित्तलं भवति, अत एव रुद्रयामले—'शुल्वखर्परसंयोगे जायते पित्तलं शुभ'मित्युक्तम्।

रीतिका युगलं रूक्षं सतिक्तं लवणं सरम्।
शोधनं पाण्डुरोगघ्नं कृमिघ्नं लेखनं हिमम् ॥
अष्टभागेन ताम्रेण द्विभागखुरकेण च।
विद्रुतेन भवेत्कांस्यं तत्सौराष्ट्रभवं शुभम् ॥

र. र. स. अ. ५. २०५।

कांस्यं कषायं तिक्तोष्णं लेखनं विशदं सरम्।
रूक्षं गुरु च चक्षुष्यं कफपित्तहरं परम्।

यशदप्रकरणेऽपि पित्तलविधानमुक्तम्। ताम्रस्य यशदस्य ये गुणास्ते पित्तले ज्ञेयाः। ताम्रवङ्गयोर्मिलिता गुणाः कांस्ये ज्ञेया इति ताम्रवच्छब्दार्थः। मा० ½ र.। रीतिविषये विशेषस्तु. र. का. धे द्रष्टव्यः धा. सं २ ॥ २७९ ॥

पित्तल तथा कांसे को तांबे के समान ही भस्म करे तथा तांबे के समान ही उनका शोधन करे। इनके गुण भी तांबे के समान ही हैं। मा० ½ र. ॥ २७९ ॥

अथ नागवङ्गयोः शोधनम्—

नागवङ्गे च गलिते रविदुग्धेन सेचिते ।
त्रिवारान् शुद्धिमायातः सच्छिद्रे हण्डिकान्तरे ।२८०।

नागवङ्गशोधनमाह—नागवङ्गे इति-पूर्वं तैलतक्रादिके शोधयित्वा पुनः नागवङ्गे गलिते कृत्वा त्रिः, रविदुग्धेन रविदुग्धाभाव-अर्कपत्ररसेन सेचयेत् । इत्थमत्र प्रक्रिया-नागवङ्गे नातिद्रुते कृत्वा हण्डिकायामर्कदुग्धं दत्त्वा हण्डिकामुखे सछिद्रमावरणं च दत्त्वा-आवरछिद्रद्वारेण (नलिकया वा छिद्रयुक्तया) अर्कदुग्धे प्रक्षिपेत् । अतितप्तं प्रकाशसिक्तं च चिटचिटायते दहति चोड्डीय सेकुरङ्गानीति-अत उक्तम् सच्छिद्रे हण्डिकान्तर इति ॥२८०॥

नागवङ्ग को आग में पिघला आक के दूध में सोचें । इस प्रकार तीन वार सींचने से ये शुद्ध हो जाते हैं । सींचने से पूर्व एक हांडी में आक का दूध डाल दें और उसके मुख पर सछिद्र भारी शराव रखें । छिद्र में से इन्हें दूध में डालें । नहीं तो वे उछल कर बाहर आते हैं और हाथ मुँह आदि को जला देते हैं ॥ २८० ॥

मतान्तरम्—

वङ्गं चूर्णोदके स्विन्नं यामार्द्धेन विशुध्यति ॥२८१॥

(इति नागवङ्गशुद्धिः)

वङ्गशोधनस्य प्रकारान्तरमाह वङ्गमिति--चूर्णोदके = सुधा चूर्णजले-प्रस्थमितजले द्वितोलं सुधाचूर्णमवाप्य आलोड्य च घटिकानन्तरमुपरिस्थं स्वच्छं चूर्णोदकं गृहीत्वा तेन वङ्गपत्राण्यर्धयामं दोलायन्त्रे स्वेदयेत् ॥ २८१ ॥

रांग के अत्यन्त बारीक पत्र को चूने के जल में दोलायन्त्र से आधा पहर तक स्वेदन करें तो शुद्ध हो जाता है ॥ २८१ ॥

अथ सीसकमारणम्—

भूभुजङ्गमगस्तिश्च पिष्ट्वा पत्रं प्रलेपयेत् ।
तत्र संविद्रुते नागे वासापामार्गसम्भवम् ॥ २८२ ॥
क्षारं विमिश्रयेत् तत्र चतुर्थांशंगुरूक्तितः ।
प्रहरं पाचयेच्चुल्ल्यां वासादर्व्या च चालयेत् ॥२८३॥
तत उद्धृत्य तच्चूर्णं वासानीरेण मर्दयेत् ।
(पुटेत्पुनः समुद्धृत्य तेनैव परिमर्दयेत्)
एवं सप्तपुटैर्नागं सिन्दूरं जायते ध्रुवम् ॥ २८४ ॥

नागमारणमाह--भूभुजङ्गमिति--नीलाञ्जनान्मृद्वार-शृङ्गादपि नागोत्पत्तिर्भवति । खनिश्चास्य ब्रह्मदेशस्य वौडविन-मण्डलेऽस्ति ।

परिचयः—नागो हि मलिनश्वेतवर्णो नखेन कर्तितुं शक्यते, घर्षणेन पत्रे कृष्णरेखां करोति घनघातेन पत्राणि स्फुटन्ति वातयोगे न कोप्यस्य विशेषो भवति, अशुद्धजले ईषद् द्रवति तज्जलपानेन संधिपीडापक्षवधशूलादयो बहुविधा रोगा भवन्ति । भूभुजङ्गो=भूनागः, अगस्तिर्मुनिद्रुमः तत्पर्णरसम् द्वयमपि मिश्रयित्वा पत्रं=नागपत्रं प्रलेपयेत् । नागे सम्विद्रुते=गलिते

१. GALENA काला सुर्मा इति भाषा

वासापामार्गाभ्यां सम्भवो निष्पत्तिर्यस्य तं क्षारं चतुर्थांशं= द्वयं मिलितं नाग चतुर्थांशं गुरूक्तितोऽल्पाल्पतया विमिश्रयेत्। प्रहरमिति-यावताऽखिलं भस्मीभवति तावतेत्यर्थः । वासा-दार्व्या=वासा दण्डेन । भस्मीभूतञ्च शरावेण पिधाय तीव्राग्निना दहेत् । तदनु स्वाङ्गशीते च वासानीरैर्मर्दनं पुटनं च एवं सप्तपुटैः=सप्तवारपुटदानेन सिन्दूरं=सिन्दूरवर्णम्। रसमञ्जरीत उद्धृतेऽस्मिन्पाठे आ. वे. प्रकाशे तु-भूभुजङ्गमगस्ति च पिष्ट्वा-ऽहेः पत्रमादिहेदिति समानः पाठः। एवं र. र. आ. पिष्ट्वाऽगस्तिञ्च भूनागम्...इति पाठः ॥ ८.८६ ॥ २८२-२८४ ॥

भूनाग और अगस्ति के पत्र को पीस मृत्पात्र की लिप्त कर उस पात्र में सीसे को पिघला समभाग बांसा अपामार्ग के क्षार सीसे के चतुर्थांश चुटकी २ भर छोड़ते जावें । नीचे से आग दे साथ ही बांसे के डण्डे से सीसे को हिलाते जावें। एक पहर आग दे चुकने के पीछे जब सीसे का भस्म हो जावे तब नीचे उतार कर उस चूर्ण को बांसे के रस से मर्दन कर पुट देवें। इस प्रकार सातवार करने से सिन्दूर के समान लाल रंग की सीसे की भस्म प्राप्त होगा ॥ २८२--२८४ ॥

अन्यमतम्—

त्रिभिः कुम्भीपुटैर्नागो वासारसविमर्दितः ।
सशिलो भस्मतामेति तद्रजः सर्वमेहजित् ॥ २८५ ॥

प्रकारान्तरेण नागमारणमाह—त्रिभिरिति-कुम्भीपुटैः=गजपुटैः

सार्धसप्तशतवनोपलपुटैरित्यर्थः । सशिलोऽष्टमांशशुद्धमनःशिला-चूर्णयुतः सम्पुटस्थइत्यपि ज्ञेयम्। मात्रा च ¼-½ र.। सर्वमेह-जित् इति मेहे धात्रीरसानुपानेन देयः ॥ २८५ ॥

शुद्ध सीसा और शुद्ध मनसिल समभाग ले बांसे के रस से मर्दन कर तीन बार गजपुट दे, इससे सीसा भस्म हो जाता है। यह भस्म सब प्रकार के प्रमेहों को दूर करता है ॥ २८५ ॥

दशनागबलं धत्ते वीर्य्यायुःकान्तिवर्द्धनम्।
मेहान् हन्ति हतं नागं, सेव्यं बङ्गञ्च तद्गुणम्॥ २८६ ॥

दशेति—नागोऽत्र हस्ती। नागगुणान् वंगेऽतिदिशति। बङ्गञ्च तद्गुणमिति-तद्गुणं=नागगुणम् ॥ २८६ ॥

सीसे की भस्म को सेवन करने से दश हाथियों का बल होता है, वीर्य आयु तथा कान्ति की वृद्धि होती है, प्रमेह नष्ट होते हैं। बङ्ग भस्म सेवन के भी ये ही गुण हैं ॥ २८६ ॥

अथ शुद्धनागगुणाः—

तारस्य रञ्जनो नागो वातपित्तकफापहः।
ग्रहणीकुष्ठगुल्मार्शः शोषव्रणविषापहः ॥ २८७ ॥

[इति नागमारणम्]

नागगुणानाह तारस्येति—तारस्य रौप्यस्य रञ्जनः, एतत्तु वाद-प्रकरणे द्रष्टव्यम्। शोषे=अन्त्रक्षये वरुणत्वक् काथेन व्रणे च क्लिन्नव्रणे शुष्कचूर्णं देयम्। अन्यत्र घृतेन लेपः कार्यश्चमत्करोति। ॥ २८७ ॥

सीसा चांदी को रँग देता है। वात पित्त और कफ दोष को दूर करता है। ग्रहणी कुष्ट गुल्म बवासीर शोष व्रण तथा विषों का नाशक है।

नाग की भस्म जो मनःशिला वा गन्धक के संयोग से की जाती है वही सर्वोत्तम जाननी चाहिए ॥ २८७ ॥

अथ वङ्गमारणम्—

वङ्गं सतालमर्कस्य पिष्ट्वा दुग्धेन सम्पुटेत्।
शुष्काश्वत्थभवैर्वल्कैः सप्तधा भस्मतां नयेत् ॥ २८८ ॥

वङ्गमारणमाह—वङ्गमिति-वङ्गं द्विविधं खुरकं मिश्रकं चेति, अत्र मिश्रके नागगन्धताम्रलोहसोमलानां योगः खनेरेव भवति। विक्रेतारस्तु पुनरपि नागमत्र मेलयन्ति, तन्नागयुतं श्यामशुभ्रकं त्वरितं द्रवति कालिकायुतम्। खुरकं च धवलं मृदुलं स्निग्धं छेदे च चाकचक्ययुतं निःशब्दं द्रुतद्रावं सगौरवमाघातेन वर्धनीयं (अस्य पत्राणि भवन्ति न तु सूत्राणि) सीसकात्कठिनं कर्त्तितुं शक्यम् न चात्र जलेन वायुना वा कश्चिद्विशेषो भवति, अतो लौहताम्रपित्तलादिपात्रेषु ऊष्णीकृतेषु नवसादरचूर्णं प्रक्षिप्य तत्र द्रुतवङ्गस्य प्रलेपनं ततो वस्त्रेण प्रोञ्छनम्। मिश्रकलेपस्तु कालान्तरेण श्यामायते तल्लेपकृतपात्रस्थपदार्थसेवनं बहुरोगकरम्। शुद्धं वङ्गसमानं शुद्धतालमर्कस्य=रवेः=दुग्धेन पिष्ट्वा तेन वङ्गपत्राणि प्रलिप्य सम्पुटे कृत्वा शुष्कैरश्वत्थस्य=पिप्पलवृक्षस्य भवैः, वल्कैः=त्वग्भिः, सप्तधा=सप्तवारम्। भस्मतां नयेत् ॥ २८८ ॥

शुद्ध वङ्ग शुद्ध हड़ताल को समभाग ले आक के दूध से पीस उस पर पीपल वृक्ष की सूखी छाल का सम्पुट दे कर पुट दे। इस प्रकार सात वार में वङ्ग की उत्तम भस्म हो जाती है। भांग के पत्तों का, इमली वा पीपल की छाल का चूर्ण पुराने कपड़े के टुकड़े में बिछा उसमें वङ्ग के पत्र रख ऊपर से भी चूर्ण डाल लपेट बत्ती बनाकर जलाने से स्वच्छ वङ्ग भस्म होती है। यह वङ्गभस्म का सरल प्रकार है। रससिन्दूर की कज्जली के साथ वङ्ग मिलाने से शीशी के तले में जो वङ्गभस्म मिलती है वह उत्तम है।

बर्त्तन में कलई। बर्त्तन को गरम कर नौसादर का चूर्ण फेर दे ऊपर से पिघला राङ्ग फेर कर फिर रगड़ कर पोंछने से कलई हो जाती है ॥ २८८ ॥

अपामार्गोद्भवंचूर्णं तत्तुल्यं तत्र मेलयेत् ॥ २८९ ॥
स्थूलाग्रया लौहदर्व्या शनैस्तदभिमर्दयेत्।
यावद्भस्मत्वमाप्नोति तावन्मर्द्यन्तु पूर्ववत् ॥ २९० ॥
ततस्त्वेकीकृतंचूर्णं कृत्वा चाङ्गारवर्जितम्।
नूतनेन शरावेण रोधयेच्च भिषग्वरः।
पश्चात् तीव्राग्निना पक्वं वङ्गभस्म भवेद् ध्रुवम् ।२९१।

प्रकारान्तरेणाह—अपामार्गेति-द्रुते वंगे-अपामार्गोद्भवं चूर्णं क्षारं वा तत्तुल्यं=वङ्गतुल्यम् क्वचिच्चतुर्थांशापामार्गचूर्णदानविधिः। स्वल्पं स्वल्पं तत्र शनैः शनैः क्षिपन् स्थूलाग्रलौहदर्व्या-अभितो

मर्दयेत्। भस्मीभूते चैकीकृतं चूर्णं शरावेण पिधाय तीव्राग्निं दद्यात् वङ्गभस्म भवेत्। ततः सम्प्रदायात्-पुनः पुनः जलेन प्रक्षाल्य संशोष्य च शरावसम्पुटे कृत्वा तीव्राग्निना पचेत् यावद्वारितरं पुनः पुटेत्॥ २८९--२९१॥

विशुद्ध वङ्ग के पत्रों को हांडी वा कड़ाही में रख आग पर पिघला समान भाग अपामार्ग का चूर्ण थोड़ा थोड़ा डालता जावे और लोहे की कड़छी से--जिसका अगला भाग मोटा हो-धीरे धीरे मर्दन करता जाय। जब सम्पूर्ण भस्म हो जाय अपामार्ग के अङ्गारे न रहें तब इस भस्म को एकत्र कर एक नये शराव से ढक दे और नीचे तीव्र आग दे तो निश्चय वङ्गभस्म हो जाती है॥ २८९---२९१॥

मतान्तरम्—

वङ्गं खर्परके कृत्वा चुल्ल्यां संस्थापयेत् सुधीः।
द्रवीभूते पुनस्तस्मिन् चूर्णान्येतानि दापयेत्॥ २९२॥
प्रथमे रजनीचूर्णं द्वितीये च यमानिकाम्।
तृतीये जीरकञ्चैव ततश्चिञ्चात्वगुद्भवम्॥ २९३॥
अश्वत्थवल्कलोत्थञ्च चूर्णं तत्र विनिक्षिपेत्।
एवं विधानतो वङ्गं म्रियते नात्र संशयः॥ २९४॥

पुनः प्रकारान्तरेणाह—वङ्गमिति-खर्परके=कटाहे वा कृत्वा द्रवीभूते च रजन्यादिचूर्णं मिलितं वङ्गतुल्यं क्रमेण स्वल्पं स्वल्पं क्षिपन् दर्व्या चालयेत्। भस्मीभूते च शरावेण पिधाय तीव्राग्निं

दद्यात्। रजनी=हरिद्रा, यवानी=अजवायन इति, जीरकं=श्वेतजीरकम्। अथ सम्प्रदायान् वङ्गचतुर्थांशतालं दत्त्वा निम्बूकरसेन कन्यकारसेन वा दृढं विमर्द्य चक्रिकां कृत्वा पिप्पलत्वक्चूर्णगर्भिते शरावसम्पुटे कृत्वा सप्तधा पुटेत्। ताल-तु प्रथमवारमेव देयम्।

अत्र त्रिलोहम्--शरावे नागवङ्गौ च रसकं प्रक्षिपेत्तथा।
ध्मात्वा चिरं द्रवीभूतं तदूर्ध्वं च मुहुर्मुहुः।
राजवृक्षत्वचश्चर्णं विकिरेत्तेन मर्दयेत्।
इत्थं मुहुश्चिरं कुर्वन् त्रिलोहं भस्म जायते॥
रसकौमुदी २-२१॥

भस्मीभूते च शरावेण पिधानमधस्तीव्राग्निदानं च पूर्ववत्। पश्चात् आरग्वधत्वक्काथेन मर्दनं तत्त्वक्चूर्णगर्भितंशरावसम्पुटे कृत्वा गजपुटदानात् चतुर्दशपुटैः, पीतं भस्म भवति। अर्धरक्ति मात्रया मधुना प्रातः सायं देयम्। त्रिभिर्दिनैर्मूत्रं प्रसादयति मधुमेहेप्युपयुज्यते।

अपिच—कासश्वासक्षयो रक्तपित्तं कुष्ठं प्रमेहकः।
आबाल्यं वह्निमांद्यं च मुक्त्वा गच्छन्ति रोगिणम्॥
र. सार.। ३-५।

आरग्वधत्वग्वन्निम्बपत्रैरपि त्रिलोहभस्म सम्पद्यते।

अन्यत्त्रिलोहम्--पञ्चविंशतिः स्वर्णस्य तथा रौप्यस्य षोडश।
ताम्रस्य दशभागाश्च त्रिलोहं मिलिता मतम्।
त्रिलोहं सर्वदोषघ्नं परमेव रसायनम्।
पाचनं दीपनं चैव सर्वव्याधिविनाशनम्॥

शोधनं मारणं च सुवर्णवत् ।
रक्तिकामानतो भस्म त्रिलोहस्य यथाविधि ।
सर्पिर्मधुवराव्योषसंयुक्तं यस्तु सेवते ।
पथ्याशी नियतं प्रातर्दीर्घायुः स सुखी सदा ।
वलीपलितनिर्मुक्तो भजते विपुलांश्रियम् । र. ज. ख. ३. अ. ३.

सुवर्णवङ्गम्—वङ्गस्य १२ भा. सूतस्य ६ भा. गन्धस्य ७ भा. नरसारस्य ६ भा. केचिन्मते सोरकस्य १ भा. ।

प्रक्रिया—द्रुते वङ्गे सूतं दत्त्वा विमृद्य तच्चूर्णं खल्वे कृत्वा सैन्धवजलेन विमर्दयेत् दिनद्वयं त्रिश्चतुर्वा मलिनं सैन्धवजलमपाकुर्यात् ततः शुष्के च गन्धादिकं दत्त्वा कज्जलीं विधाय वालुकायन्त्रे पाकः । निःशेषे च दुर्गन्धिवायौ तापमात्रा वर्धनीया, शलाकयाऽन्वेषिते सुवर्णवर्णे सति स्वाङ्गशीतलं काश्मीरकान्तिचाकचक्ययुतमङ्गुलीरेखाग्राहि मृदुभस्म यज्जले न विलीयते भवति मलिनं कठिनं च न युक्तम् । कूपिकागले च रससिन्दूरम् । एतच्च रसायनं बल्यं सौन्दर्यस्मृतिशक्तिकरं शुक्रजनकमग्निदीपनं मेहहरम् । मात्रा च १-२. र. तत्तदनुपानैः । कण्ठशालूकजन्यवधिरतायामपि भवत्यनेन लाभः । ध्वजभङ्गनाशाय बलाय च लज्जालुमूलचूर्णेन, तृष्णानिवारणाय आमलकीरसेन, स्मृतिवृद्ध्यर्थं ब्राह्मी-रसेन, प्रमेहे हरिद्रास्वरसेन, शुक्रमेहे सुरप्रिय (शीतलचीनी) चूर्णेन, श्वेतप्रदरे रक्तचन्दनक्वाथेन काकजङ्घारसेन वा ।

वङ्गभस्मनः सरलः प्रकारः—

तिलपिण्याकपिष्टेन कुर्याद्वाराहकं पुटम् ।

भस्मसादभवद्वङ्गं नानाकार्यार्थसाधकम् ॥ पारदयोगशास्त्रम् १-८४ । चिञ्चात्वक्चूर्णं विजयापत्रचूर्णं वा जीर्णवस्त्रखण्डे प्रसार्य तनूनि वङ्गपत्राणि तच्चूर्णेन सम्पुटीकृत्य गोलं विधाय दहेत् शुभ्रं भस्म भवति । ततस्तालयोगेन निरुत्थं कुर्यात् । मा. ३-१ र. ।
॥ २९२-२९४ ॥

शुद्ध वङ्ग को कड़ाही में रख चूल्हे में पिघलावे । पिघलने पर आगे कहे हुए चूर्ण क्रमशः छोड़ता जाय । लोहे की कड़छी से हिलाता जाय । पहले हल्दी का चूर्ण, फिर अजवायन का चूर्ण, फिर श्वेत जोरे का चूर्ण, फिर इमली की छाल का चूर्ण और फिर पीपल वृक्ष की छाल का चूर्ण ॥ २९२-२९४ ॥

गुणाः—

वङ्गं तिक्ताम्लकं रूक्षं किञ्चिद्वातप्रकोपणम् ।
मेदःश्लेष्मामयघ्नञ्च क्रिमिघ्नं मेहनाशनम् ॥२९५॥
(इति वङ्गमारणम्)

वङ्गभस्मगुणानाह वङ्गमिति—

तिक्ताम्लकमिति—तिक्तं च- अम्लं चेति-अल्पे ५-३-८५. इति अल्पार्थे कन् । किञ्चित्-ईषत्-वातप्रकोपणं रूक्षत्वादिति भावः । मेहनाशनमिति प्रमेहहरमित्यर्थः ।

यथा—सिंहो यथा हस्तिगणं निहन्ति ।
तथैव वङ्गो ऽखिलमेहवर्गम् ॥

'वङ्गं भक्षयतो नरस्य न भवेत्स्वप्नेऽपि शुक्रक्षयः' । इत्यादि वाक्यानि वङ्गप्रशस्तिपराणि । प्रमेहे मधुयुतेन गुडूचीसत्वेन

स्वरसेन वा, वीर्यपुष्ट्यर्थं लघुशाल्मलीमूलचूर्णेन विदारीमूलचूर्णेन वा । उष्णवाते-सुरप्रियफलचूर्णेन इत्यादिः, तत्तद्रोगहरानुपानैर्योज्यम् । विशेषस्तु अत्र ग्रन्थान्तरेभ्यो ज्ञेयः। तिक्ताम्लकमत्र तिक्तोष्णकमिति पाठान्तरम् ॥ २९५ ॥

वङ्गभस्म तिक्त, गरम रूक्ष है। कोष्ठ में वात का कुछ प्रकोप करता है। मेद और श्लेष्मा के रोगों का नाशक है क्रिमि और प्रमेह को दूर करता है ॥ २९५ ॥

अथ लौहशोधनादिकम्-

तप्तानि सर्वलोहानि कदलीमूलवारिणि ।
सप्तधा त्वभिषिक्तानि शुद्धिमायान्त्यनुत्तमाम् ॥२९६॥

क्रमप्राप्तं लौहमाह-तप्तानीति-लौहस्य प्रधान खनिजानितु गैरिक F_2O_3. चुम्बक-Fe_3O_4. रौप्यमाक्षिक FeS. विमल। FeS_2 स्वर्णमाक्षिकानि $CuFeS_2$. तत्र गैरिकं--गैरिक, स्वर्णपाषाणपीतकपिलभेदेन पञ्चविधं लौहस्य प्रधानं खनिजमिति । लौहस्य द्रवणाङ्क १५०० कथनाङ्के २९५० प्रागप्युक्ते ।

सर्वलौहानि—'मुण्डं तोक्ष्णञ्च कान्तं च त्रिप्रकारमयस्मृत'-मिति त्रिविधानि--एषु यथोत्तरं गुणाधिक्यम् । सरलशोधनप्रकारोऽयं स्वर्णादिसर्वलोहानि कदली=मोचा (केला) तन्मूलवारिणि=तत्कन्दस्वरसे, तप्तानि=उष्णीकृतान्यग्निवर्णानीत्यर्थः, सप्तधा=सप्तवारं, अभिषिक्तानि=निषेचितानि, अनुत्तमाम्=सर्वोत्तमां, शुद्धिमायान्ति। इत्थमत्र प्रक्रिया तिलोत्सेधानि द्व्यंगुल—विस्तृतानि-

लोहपत्राणि-अष्टगुणे निमज्जन मात्रे वा कदलीरसे तप्तानि निषेचयेत्। कदलीस्वरसस्तु प्रतिवारं नवीन एव योज्यः। एवं तैलतक्रादिश्वपि-ज्ञेयम् । अद्यत्वे तु जीर्णशस्त्रादेः शाणाकृष्टं चूर्णं चुम्बकेन मलात्पृथक् कृत्य व्यवहरन्ति ॥ २९६ ॥

सब लोहों को गरम कर केले की जड़ के रस में सात बार बुझायें तो वे उत्तम शुद्ध हो जाते हैं ॥ २९६ ॥

क्वाथ्यमष्टगुणे तोये त्रिफला षोडशं पलम् ।
तत्क्वाथे पादशेषे तु लौहस्य पलपञ्चकम् ॥ २९७ ॥
कृत्वा पत्राणि तप्तानि सप्तवारं निषेचयेत् ।
एवं प्रलीयते दोषो गिरिजे ! लौहसम्भवः ॥ २९८ ॥

(इति लौहशोधनम्)

प्रकारान्तरेण लौह शोधनमाह क्वाथ्यमिति—लौहस्य तच्चूर्णस्य पत्राणां वा पलपञ्चकं=पञ्चपलं यत्र शोधनीय तत्र त्रिफलायाः षोडशं पलमष्टगुणे तोये-अष्टाविंशत्युत्तरशतपले क्वाथ्यं=कथनीयम्। पादशेषे=चतुर्थांशाऽवशिष्टे द्वात्रिंशत्पल इत्यर्थः। तत्क्वाथे पत्राणि=तिलोत्सेधसमानि लौहपत्राणि तप्तानि=अग्निवर्णानीत्यर्थः। कृत्वा सप्तवारं=सप्तधा निषेचयेत्। हे गिरिजे ? एवं लोहसम्भवो=लोहस्थितो दोषः प्रलीयते=नश्यति। क्वाथ्यमष्टगुणे-इत्यत्र-त्रिफलाष्टगुणे-इति बहुपुस्तकसम्मतोऽपि पाठोऽसम्बद्धत्वादपपाठ एव। गिरिजे-अत्र-गिरिज इति बहुपुस्तकसम्मतः पाठः ॥ २९७–२९८ ॥

सोलह पल त्रिफला लेकर उसमें १२८ पल पानी डाले और इसे

मिट्टी के पात्र में पका कर शेष ३२ पल रहने पर छान ले। यह त्रिफलाक्वाथ है। इसमें लौह के पत्र पाँच पल लेकर गर्म करके सात बार बुझावे। ऐसा करने से हे पार्वति ! लोहे का दोष दूर हो जाता है॥ २९७-२९८॥

भानुपाकात् तथा स्थालीपाकाच्चपुटपाकतः।
निरुत्थो जायते लौहो यथोक्तफलदा भवेत् ॥२९९॥

अथापि सरलप्रकारः—

चिञ्चापत्रजलक्वाथादयो दोषमुदस्यति।
यद्वा फलत्रयोपेतं गोमूत्रे क्वथितं खलु॥

शोधनानन्तरं निरुत्थीकृतस्यैव लौहस्य प्रयोगः फलदो भवति, अतः तदुपायानाह भानुपाकादिति—भानोः=सूर्यस्य प्रखरकिरणैः त्रिफलाक्वाथादौ यत्र लोहस्य पाकः क्रियते स भानुपाकः। एवं स्थाल्यामग्निना त्रिफलाक्वाथादौ पाकः स्थालीपाकः। पुटपाकः—रसादिद्रव्यपाकानां प्रमाणज्ञापनं पुटम्, तत्र पाकः=महापुटादौ पाकः, भानुपाकादिभिः लौहो निरुत्थोऽपुनर्भवो जायते॥ २९९॥

भानुपाक, स्थालीपाक, पुटपाक से लोहे की निरुत्थ भस्म यथोक्त फल देने वाली होती है॥ २९९॥

अथ भानुपाक विधि—

लौहे दृषदि लौहस्य मुग्दरेण हतं मुहुः।
कृत्वाम्बुगलितं शुद्धं जलेन त्रैफलेन वा॥ ३००॥
चालयेद्बहुशः पश्चात् कृत्वा द्रव्यान्तरं पृथक्।
शोषितं भानुभिर्भानोर्भानुपाके प्रयोजयेत्॥ ३०१॥

भानुपाकविधानमाह लौहमिति—भानुपाकार्थं लौहस्य चूर्णं कर्तव्यम् तत्प्रकारः प्रदीयते। लौहं पूर्वं त्रिफलादिना शोधितं लोह-निर्मिते खल्वे, लोहसदृशदृढे दृषदि, कृष्णपाषाणे वा लौहस्य मुद्गरेण=लोहमुशलेन मुहुः=पुनः पुनः, हतं=ताड़ितं चूर्णीकृतमिति यावत्। ततोऽम्बुगलितं त्रैफलेनाऽनुपदोक्तविधिना कृतेन त्रिफला-जलेन बहुशोऽनेकवारं चालयेत्। पश्चात् द्रव्यान्तरंलौहातिरिक्तं मलं लौहात्पृथक् कृत्वा भानोः=सूर्यस्य, भानुभिः=किरणैः शोषितं लौहचूर्णं भानुपाके प्रयोजयेत्॥ ३००-३०१॥

लोहे में वा पत्थर में लोहे की मूसली से लोह को बार बार कूट साफ पानी में डाल अथवा त्रिफला क्वाथ में डाल अनेक बार धो लोहे में जो अन्य द्रव्य मिले हों उनको निकाल धूप में सुखा कर भानुपाक करे। लोहे को धोने और भानु पाक के लिए भी त्रिफला लोहे के समान ली जाती है क्वाथ में जल दुगुना डाल चौथा हिस्सा शेष रखे। इस प्रकार त्रिफला का क्वाथ और जल अनेक बार डाल निरन्तर तीन दिन धूप में सुखावे या लोहे में त्रिफला का क्वाथ अनेक बार दे वैद्य धूप में ७ बार लोह को सुखा ले॥ ३००-३०१॥

चालने, भानुपाके तु लौहतुल्यं फलत्रिकम्।
जलं द्विगुणित दत्त्वा चतुर्भागावशेषितम्॥ ३०२॥

भानुपाके काथार्थं त्रिफलामानमाह-चालन इति—भानुपाके कर्त्तव्ये लौहतुल्यं—यत्परिमाणस्य लौहस्य पाकः करणीयः तत्तुल्यं फलत्रिकं=त्रिफला ग्राह्या तत्र जलं त्रिफलाद्विगुणितं-दत्त्वा चतुर्भागा-

मिट्टी के पात्र में पका कर शेष ३२ पल रहने पर छान ले। यह त्रिफलाक्वाथ है। इसमें लौह के पत्र पाँच पल लेकर गर्म करके सात बार बुझावे। ऐसा करने से हे पार्वति! लोहे का दोष दूर हो जाता है॥ २९७-२९८॥

भानुपाकात् तथा स्थालीपाकाच्चपुटपाकतः।
निरुत्थो जायते लौहो यथोक्तफलदा भवेत् ॥२९९॥

अथापि सरलप्रकारः—

चिञ्चापत्रजलक्वाथादयो दोषमुदस्यति।
यद्वा फलत्रयोपेतं गोमूत्रे क्वथितं खलु॥

शोधनानन्तरं निरुत्थीकृतस्यैव लौहस्य प्रयोगः फलदो भवति, अतः तदुपायानाह भानुपाकादिति—भानोः=सूर्यस्य प्रखरकिरणैः त्रिफलाक्वाथादौ यत्र लोहस्य पाकः क्रियते स भानुपाकः। एवं स्थाल्यामग्निना त्रिफलाक्वाथादौ पाकः स्थालीपाकः। पुटपाकः—रसादिद्रव्यपाकानां प्रमाणज्ञापनं पुटम्, तत्र पाकः=महापुटादौ पाकः, भानुपाकादिभिः लौहो निरुत्थोऽपुनर्भवो जायते॥ २९९॥

भानुपाक, स्थालीपाक, पुटपाक से लोहे की निरुत्थ भस्म यथोक्त फल देने वाली होती है॥ २९९॥

अथ भानुपाक विधि—

लौहे दृषदि लौहस्य मुद्गरेण हतं मुहुः।
कृत्वाम्बुगलितं शुद्धं जलेन त्रैफलेन वा॥ ३००॥
क्षालयेद्बहुशः पश्चात् कृत्वा द्रव्यान्तरं पृथक्।
शोषितं भानुभिर्भानोर्भानुपाके प्रयोजयेत्॥ ३०१॥

भानुपाकविधानमाह लौहमिति—भानुपाकार्थं लौहस्य चूर्णं कर्तव्यम् तत्प्रकारः प्रदीयते। लौहं पूर्वं त्रिफलादिना शोधितं लोह-निर्मिते खल्वे, लोहसदृशदृढे दृषदि, कृष्णपाषाणे वा लौहस्य मुद्गरेण=लोहमुशलेन मुहुः=पुनः पुनः, हतं=ताडितं चूर्णीकृतमिति यावत्। ततोऽम्बुगलितं त्रैफलेनाऽनुपदोक्तविधिना कृतेन त्रिफला-जलेन बहुशोऽनेकवारं क्षालयेत्। पश्चात् द्रव्यान्तरं लौहातिरिक्तं मलं लौहात्पृथक् कृत्वा भानोः=सूर्यस्य, भानुभिः=किरणैः शोषितं लौहचूर्णं भानुपाके प्रयोजयेत्॥ ३००-३०१॥

लोहे में वा पत्थर में लोहे की मूसली से लोह को बार बार कूट साफ पानी में डाल अथवा त्रिफला क्वाथ में डाल अनेक बार धो लोहे में जो अन्य द्रव्य मिले हों उनको निकाल धूप में सुखा कर भानुपाक करे। लोहे को धोने और भानु पाक के लिए भी त्रिफला लोहे के समान ली जाती है क्वाथ में जल दुगुना डाल चौथा हिस्सा शेष रखे। इस प्रकार त्रिफला का क्वाथ और जल अनेक बार डाल निरन्तर तीन दिन धूप में सुखावे या लोहे में त्रिफला का क्वाथ अनेक बार दे वैद्य धूप में ७ बार लोह को सुखा ले॥ ३००-३०१॥

क्षालने, भानुपाके तु लौहतुल्यं फलत्रिकम्।
जलं द्विगुणितं दत्त्वा चतुर्भागावशेषितम्॥ ३०२॥

भानुपाके क्वाथार्थं त्रिफलामानमाह-क्षालन इति—भानुपाके कर्त्तव्ये लौहतुल्यं—यत्परिमाणस्य लौहस्य पाकः करणीयः तत्तुल्यं फलत्रिकं=त्रिफला ग्राह्या तत्र जलं त्रिफलाद्विगुणितं-दत्त्वा चतुर्भागा-

वशेषितं चतुर्थांशमवशिष्टं यथा-पञ्चपललौहे साध्ये पञ्चपला त्रिफला ग्राह्या जलस्य दशपलानि देयानि अवशेषश्च सार्धद्विपलम् एवं क्षालने=लौहप्रक्षालनेऽपि ज्ञेयम् ॥ ३०२ ॥

लोहे के धोने के लिए भानुपाक में तो त्रिफलाक्वाथ बनाने को लोहे के समभाग ही त्रिफला लें, उसमें दुगुना जल डालकर क्वाथ करें। जब चौथाई जल बच जावे तो उतार लें ॥ ३०२ ॥

एवमुक्तं फलक्वाथ-जलं दत्त्वा पुनः पुनः ।
शोषयेत् सूर्यतेजोभिर्निरन्तरमहस्त्रयम् ॥ ३०३ ॥

भानुपाककालनियममाह—एवमिति--उक्तं पूर्वोक्तप्रकारेण कृतं फलक्वाथजलं=त्रिफलाक्वाथपानीयं पुनः पुनर्दत्त्वा निरन्तर=मवसानमदत्त्वैव, अहस्त्रयं=त्रिदिनम्, सूर्यतेजोभिः=सूर्यकिरणैः शोषयेत् । ॥ ३०३ ॥

इस प्रकार से बने त्रिफला के क्वाथ को छान लोहे में डाल पुनः २ तीन दिन निरन्तर सूर्य की किरणों से सुखावें ॥ ३०३ ॥

अथवा तत्र तत्क्वाथं दत्त्वा दत्त्वा भिषग्वरः ।
सप्तसप्तिकरैरेव सप्तवारान् विशोषयेत् ॥ ३०४ ॥

(इति भानुपाकविधिः)

भानुपाकस्य प्रकारान्तरमाह--अथवेति-तत्र=लौहे तत्क्वाथमुक्त-त्रिफलाक्वाथं सप्तवारान् दत्त्वा सप्त सप्तयोऽश्वा यस्य सः तस्य सूर्यस्येत्यर्थः करैर्विशोषयेत् सप्तसप्तिकरैः ॥ ३०४ ॥

इति भानुपाकः ।

अथवा वैद्य इसप्रकार के बने त्रिफला के क्वाथ को ही लोहे में डाल धूप में सुखावे इसप्रकार सात बार करे ॥ ३०४ ॥

अथ स्थालीपाकविधिः—

इत्थमादित्यपाकान्ते स्थाल्यां पाकमुपाचरेत् ।
स्थालीपाके फलं ग्राह्यमयसस्त्रिगुणीकृतम् ।
तस्य षोडशिकं तोयमष्टभागावशेषितम् ॥ ३०५ ॥
मृदुमध्यकठोराणामन्येषामयसा समम् ।
क्वथनीयं समादाय चतुरष्टौ च षोडश ॥ ३०६ ॥
गुणानां स्थाप्यते तोयं शेषयेदयसा समम् ।
स्वरसस्यापि लौहेन स्थालीपाके समानता ॥३०७॥

इत्थमिति-आदित्यपाकान्ते=कृते भानुपाके स्थाल्यां=हण्डिकायां लौहकटाहेपि अवस्तेव, पाकमुपाचरेत्=कुर्यात् । स्थालीपाके च फलं=त्रिफला, अयसः=साध्यस्य लौहस्य त्रिगुणीकृतं=त्रिगुणं, यथा-पञ्चपललौहे साध्ये पञ्चदशपलानि त्रिफलाया ग्राह्याणि, तस्य=त्रिफलायाः, षोडशिकं=षोडशगुणं तोयं=जलं दत्त्वा विपाच्याष्टभागावशेषितमष्टमांशमवशिष्टं तोयं जलं (क्वाथः) ग्राह्यम् त्रिफलातिरिक्तद्रव्याणां क्वाथे नियममाह मृद्विति-अन्येषां त्रिफलातिरिक्तानां द्रव्याणां क्वथनीयं=क्वाथ्यद्रव्यमयसा=लोहेन समं समानं समादाय तोयं च तत्र मृदूनां क्वथनीयस्य चतुर्गुणं मध्यानामष्टगुणं कठोराणां षोडशगुणं तोयं दत्त्वा क्वाथ विपाच्य अयसा समं=लोहमानं शेषयेत् ॥ ३०५-३०७ ॥

इसप्रकार भानुपाक के बाद स्थालीपाक करे। स्थालीपाक में लोहे से तिगुनी त्रिफला लेवे। उससे सोलह गुणा पानी डाल पकावे शेष आठवां भाग बेचने पर उतार ले।

त्रिफलासे अन्य औषधियों का स्थालीपाक करना हो तो लोहे के समान ले। जो मृदु द्रव्य हों उनमें चार गुणा, मध्यम द्रव्यों में आठ गुणा तथा कठोर द्रव्यों में सोलह गुणा पानी डाल पकावें क्वाथ लोहे के बराबर शेष रखे। यदि किसी औषध का स्वरस लेना हो, तो वह भी लोहे के समान ही लिया जाता है ॥३०५-३०७॥

स्थाल्यां क्वाथादिकं दत्त्वा यथाविधि विनिर्मितम्।
पाकेन क्षीयते यस्मात् स्थालीपाक इति स्मृतः ॥३०८॥

स्थालीपाके-स्वरसेन कर्त्तव्ये लौहेन समानता कार्या। स्थालीपाकनिरुक्तिमाह-स्थाल्यामिति-क्वाथादिकमादिपदाल्लौहं बोध्यम्। यथाविधि = यथाशास्त्रं विनिर्मितं = कृतं पाकेन क्षीयते = शुष्यति, यस्मादतः स्थालीपाक इति स्मृतः = कथितः ॥३०८॥

लोहे के साथ यथाविधि बने त्रिफला आदि औषधियों के क्वाथ स्वरस आदि को यतः हांडी में डाल आग पर पका कर क्षीण कर दिया जाता है इसीलिये स्थालीपाक कहते हैं ॥३०८॥

हस्तिकर्णपलाशस्य मूलञ्च शतमूलिका।
भृङ्गकेशाख्यराजाश्च ह्येषां निजरसैः पृथक् ॥३०९॥
मिलित्वा वा विधातव्यः स्थालीपाकः फलादनु।
यथादोषौषधेनापि स्थालीपाको विधीयते ॥३१०॥

(इति स्थालीपाकविधिः)

त्रिफलाक्वाथेन स्थालीपाकानन्तरं पाकद्रव्याण्याह हस्तिकर्णेति-फलात् = त्रिफलाक्वाथस्थालीपाकात्-अनु = पश्चादेव हस्तिकर्ण-पलाशस्य=हस्तिकर्णवत् पलाशं पत्रं यस्य तस्य मूलम्, शतमूलिका= शतावरी, भृङ्गराजाख्यराजानां श्वेतकृष्णपुष्पभेदेन द्विविधस्यापि भृङ्गराजस्येत्यर्थः। एषां त्रयाणां निजरसैः स्वरसैः सह = साकं मिलित्वा वेति-पृथक् पृथग् वा, स्थालीपाको विधातव्यः। तत्र मिलित-पक्षेऽपि पृथक् पृथक् स्वरसानामयसा साम्यम्। यथादोषौषधेन= दोषमनतिक्रम्य यथादोषम्। वातपित्तकफ-द्विदोषादि- दोषहर-वक्ष्यमाणैरण्डादिगणौषधेनापि यथायथं क्वाथेन स्वरसेन वा लौहसमेन स्थालीपाको विधीयते = क्रियते, सच त्रिफलाहस्ति कर्णपलाशादिपाकानन्तरमेव विधेयः ॥ ३०९-३१० ॥

इति स्थाली पाकः।

स्थालीपाक में सबसे प्रथम त्रिफला के क्वाथ से लोहे का पाक किया जाता है फिर हस्तिकर्णपलाश की जड़ के रस से, अनन्तर शतावरी के रस से, और पश्चात् भांगरा और केशराज के रस से पाक करना चाहिये। इन पृथक् २ वा एकत्र सब रसों को लोहे में डाल पाक करे। यदि बनायी जाने वाली लौहभस्म को किसी दोषविशेष में प्रयोग करना होतो उस दोष को नाश करने वाले द्रव्यों के रस से भी स्थालीपाक कर लेना चाहिये ॥ ३०९—३१० ॥

अथ पुटपाकविधिः—

स्थालीपाके सुसंपक्वं प्रक्षाल्य स्वच्छवारिणा।
शुष्कं सञ्चूर्ण्य यत्नेन पुटपाके प्रयोजयेत् ॥ ३११ ॥

पुटपाकमाह स्थालीति—स्थालीपाके कृते सति सुसम्पक्वं = स्थालीपाकेन सम्यक् पक्वं स्वच्छवारिणा निर्मलजलेन लौहं प्रक्षाल्य शुष्कं च सञ्चूर्ण्य पुटपाके प्रयोजयेत् ॥ ३११ ॥

स्थालीपाक में अच्छीप्रकार पके लोहे को स्वच्छ जल से धो सुखा यत्नपूर्वक चूर्ण कर पुटपाक योग्य समझे ॥ ३११ ॥

पुटाद्दोषविनाशः स्यात् पुटादेव गुणोदयः ।
म्रियते च पुटाल्लौहः पुटं तस्मात् समाचरेत् ।३१२।
यथा यथा प्रदीयन्ते पुटाः सुबहुशोऽपि ।
तथा तथा प्रकुर्वन्ति गुणानेव सहस्रशः ॥ ३१३ ॥
पुटपाकेन पक्वस्तु शस्यते रसकर्म्मसु ।
दशादिशतपर्य्यन्तो गदे पुटविधिर्मतः ॥ ३१४ ॥
शतादिस्तु सहस्रान्तः पुटो देयो रसायने ।
वाजीकर्मणि विज्ञेयो दशादिशतपञ्चकः ॥ ३१५ ॥

पुटदानस्य गुणमाह—पुटादिति—दोषविनाशो = दोषाश्च यथा,

गुरुता हृदयोत्क्लेदः, कश्मलं दाहकारिता । अश्म दोषः स दुर्गन्धो दोषा सप्तायसः स्मृताः । अ. वे. प्र. अ. ११. श्लो.२११

गुणोदयो = गुणोत्कर्षः ॥ ३१२-३१५ ॥

पुट देने से दोषों का नाश होता है तथा पुट देने से ही गुणों का उदय होता है । पुट देने से ही लौह मरता है । इसलिये पुट दे ॥ ३१२ ॥

जितने ही अधिक पुट देंगे उतने ही सहस्र गुण लोह में उदय होंगे । पुटपाक से पका ही लोहा रसकर्म्म में श्रेष्ठ माना है ॥ ३१३ ॥

रोग दूर करने के लिये दस से सौ पुट दे, रसायन कर्म में सौ से हजार, और बाजीकर्म में दस से पांच सौ पुट दे ॥ ३१४-३१५ ॥

तावद्वैद्यः पुटेल्लौहं यावच्चूर्णीकृतं जले ।
निस्तरङ्गे लघुत्वेन समुत्तरति हंसवत् ॥ ३१६ ॥
पुटपाकौषधस्यापि क्वाथो वा स्वरसोऽपि वा ।
वक्ष्यमाणप्रमाणेन कर्त्तव्यो भिषजां वरैः ॥ ३१७॥
रसाभावे तु सर्वेषां क्वाथो ग्राह्यो मनीषिभिः ।
अभावात् स्वरसस्यापि क्वाथ एव फलत्रिकात् ।३१८

पुटनमानमाह—तावदिति-चूर्णीकृतम्, = मसृणीकृतम्, निस्तरङ्गे = तरङ्गरहिते स्थिरे जले, अङ्गुलिद्वयोर्ध्वदेशतः प्रक्षिप्तं लघुत्वेन जले हंसवत्समुत्तरति = सम्यक्प्रतरति नाधो गच्छति । यथा-काचपात्रे जलं स्थिरीकृत्य तत्र लौहचूर्णं दत्त्वा यदा तच्चूर्णं जलोपरि प्रसरति तदा गोधूम बीजानि तण्डुलानि वा प्रसरति लौहे प्रक्षेप्याणि तान्यपि तत्र प्रतरन्ति चेत्तदा लौहं वारितरं ज्ञेयम् ।

अपि च—लौहादेरपुनर्भावो गुणाधिक्यं ततोऽमता ।
अनप्सुमज्जनं रेखापूर्णता पुटतो भवेत् ॥

पुटाद्ग्राव्णो लघुत्वञ्च शीघ्रव्याप्तिश्च दीपनम् ।
जारितादपि सूतेन्द्रा लौहानामधिको गुणः ॥
यथाश्मनि विशेद्वह्निर्बहिस्थः पुटयोगतः ।

चूर्णत्वाद्धि गुणावाप्तिस्तथा लौहेषु निश्चितम् । र.र.स.१०-४८-५० । रेखापूर्णता = अङ्गुलिभ्यां मर्दिते लौहे तस्याणूनामंगुलिरेखासु प्रवेशः । वक्ष्यमाणप्रमाणेन=पुटपाके फलादीनामयसा ग्रहणं समम् । (३३५ श्लो०) इत्युक्तेन ॥ ३१६-३१८ ॥

वैद्य तब तक लोहे को पुट देता जाय जब तक उसका चूर्ण तरङ्गरहित जल पर हल्का होने के कारण हंस के समान तैरे ॥ ३१६ ॥

पुट पाक की औषधों का क्वाथ वा स्वरस भी आगे कहे जाने वाले (३३५ श्लोक में) प्रमाण के अनुसार करना चाहिये ॥ ३१७॥

यदि स्वरस न हो तो उस द्रव्य का क्वाथ ले । और यतः त्रिफला से स्वरस प्राप्त नहीं हो सकता अतः त्रिफला का क्वाथ ही लेना चाहिये ॥ ३१८ ॥

अथ त्रिफलादिगणः—

त्रिफला त्रिवृता दन्ती कटुकी तालमूलिका ।
वृद्धदारश्च वृश्चीर-वृषपत्रक-चित्रकाः ॥ ३१९ ॥
शृङ्गवेरविडङ्गौ च भृङ्गभल्लातकौषधम् ।
दाडिमस्य च पत्राणि शतपुत्री पुनर्नवा ॥ ३२० ॥

कुठार-क्रामकौ कन्दः तन्त्री भेकस्य पर्णिका ।
हस्तिकर्णपलाशश्च कुलिशः केशराजकः ॥ ३२१ ॥
माणः खण्डितकर्णश्च गोजिह्वा लोहमारकः ।
गिरिशान्तनकैः प्रोक्तस्त्रिफलादिरयं गणः ।
सामान्यपुटपाकार्थमेतानिच्छन्ति सूरयः ॥ ३२२ ॥

त्रिफलेति-लौहस्य सामान्यपुटपाकार्थं त्रिफलादिगणस्य प्रयोगो भवति । त्रिवृता=निशोथ इति, दन्ती=जयपाल मूलं, तालमूलिका=मुशली, वृद्धदारकः=बिधारा इति, वृश्चीरः=श्वेतपुनर्नवा, वृषपत्रको=वासा, शृङ्गवेरः=आर्द्रकः, भृङ्गो=भृङ्गराजः, औषधं=शुण्ठी, शतपुत्री=शतावरी, कुठारः=कुठेरकवृक्षः-अथ पर्णासे कठिञ्जरकुठेरकावित्यमरः । क्रामकः कन्दः=सूरणकन्दः, तन्त्री=गुडूची, भेकस्य पर्णिका=मण्डूकपर्णी, हस्तिकर्णपलाशः=हस्तिकर्णवत्पत्रः, कुलिशः=अस्थिसंहारः, केशराजकः श्वेतपुष्पभृङ्गराजः, माणः=मानकन्दः, खण्डितकर्णः=शकरकन्द इति स च रक्तश्वेतवर्णेन द्विविधः, गोजिह्वा=धान्यविशेषः इति राजनिघण्टौ । गोजिह्वा गोभीपुष्पशाक इति कैयदेवनिघण्टुभाषा, संख्या १८३ । ELEPHANTOPUS-SCABRE. स्वनामख्यातपत्रशाकक्षुपे बै. श. सि. । केचन गोजिह्वाशब्देन गावजुवां इति कथयन्ति । लोहमारकः = शालिञ्चशाकः । अयं त्रिफलादिगणो गिरिशान्तनकैः तदाख्यैराचार्यैः । र. ज. नि. तु. गिरिशैर्योगिभिः प्रोक्तं इति पाठः बहुषु पुस्तकेषु गिरिशान्तनक इति प्रथमान्त एव पाठः प्रोक्तः ।

सूरयः=पण्डिताः सामान्यपुटपाकार्थं=साधारणपुटपाकाय। अनेन गणेन लौहस्य प्रथमं पुटपाकः करणीयः तदनु यथारोगमैरण्डाद्यन्यतमगणौषधिभिरिति ज्ञेयम् ॥ ३१९-३२२ ॥

हरड़, बहेड़ा, आंवला, निसोत, दन्तीमूल, कुटकी, मूसली, विधारा, पुनर्नवा श्वेत, बांसा के पत्ते, चीता, अदरख, वायविडंग भांगरा, भिलावा, सोंठ, अनार के पत्ते, शतावर, लाल पुनर्नवा, कुडालिया, नागरमोथा, शूरणकन्द, गिलोय, मण्डूकपर्णी, हस्तिकर्णपलाश, हडजोड़ा, केशराज, माणकन्द, खण्डितकर्ण, (बज्रकन्द-शकरकन्द), गोजिया, शालिञ्च शाक गिरिशान्तनक ने यह त्रिफलादिगण कहा है। सामान्य पुटपाक के लिए विद्वानों ने इसे निर्धारित किया है ॥ ३१९-३२२ ॥

अथ एरण्डादिगणः—

विशेषपुटपाकाय गणानन्यान् शृणूदितान्।
एरण्डः शारिवा द्राक्षा शिरीषश्च प्रसारणी ॥३२३॥
माषमुद्गाख्यपर्णिन्यौ विदारीकन्द-केतकी।
एरण्डादिगणो ह्येष सर्ववातविकारनुत् ॥ ३२४ ॥

विशेषेति—एरण्डादिगणो वातविकारिणां कृते लौहपुटपाकार्थमुच्यते शारिवा=अनन्तमूलम्, प्रसारणी=गन्धप्रसारणी, माषमुद्गाख्यपर्णिन्यौ=माषपर्णी मुद्गपर्णीचेति। केतकी—केवड़ा इति ॥ ३२३-३२४ ॥

विशेष पुटें देने के लिए अन्य गण कहते हैं। एरण्ड, अनन्तमूल, द्राक्षा, शिरीष की छाल, गन्धप्रसारिणी, माषपर्णी, मुद्गपर्णी, विदारीकन्द, केतकी। यह एरण्डादिगण वात के सब विकारों का नाश करता है। इस गण की पुट देने से लोहभस्म भी वात विकार नाशक हो जाता है ॥ ३२३-३२४ ॥

अथ किरातादिगणः—

किरातममृतानिम्ब-कुस्तुम्बुरुशतावरी।
पटोलं चन्दनं पद्मं शाल्मल्यौडुम्बरी जटा।
पैत्तिकामयहन्ताऽयं किरातादिगणो मतः ॥ ३२५ ॥

किरातादिगणमाह—किरातं=चिरायता इति, अमृता=गुडूची, कुस्तुम्बुरु=धान्यकम्, चन्दनं=रक्तचन्दनम्, पद्मं=पद्माख इति नीलकमलमित्यपरे शाल्मली=बालशाल्मलीमूलम्, औडुम्बरीजटा॥ अधःप्रसरणशीला उडुम्बरप्ररोहाः। पैत्तिकामयहन्ता=पित्तरोगशमनः। अनेन पुटपाके लौहोऽपि पित्तरोगहन्ता भवति। एवमुत्तरत्रापि ज्ञेयम् ॥ ३२५ ॥

चिरायता, गिलोय, नीम, धनियां, शतावर, पटोलपत्र, चन्दन, कमल, सेमर का मूसली, गूलर की जटा। यह किरातादिगण पित्तरोगों का नाशक है। इससे पुट देने से लोहा पित्तघ्न होता है ॥ ३२५ ॥

अथ शृङ्गवेरादिगणः—

शृङ्गवेरस्य मूलानि निर्गुण्डी कौटजं फलम्।
करञ्जद्वितयं मूर्वा शोभाञ्जन-शिरीषकौ ॥ ३२६ ॥

वरुणश्चार्कपर्णश्च पाटला कण्टकारिका ।

श्रृङ्गवेरादिको ह्येष गणः श्लेष्मगदापहः ॥ ३२७ ॥

श्लेष्मगदहरं श्रृङ्गवेरादिगणमाह—श्रृङ्गवेरस्येति । श्रृङ्गवेरमूलानि=आर्द्रकम्, निर्गुण्डी=सिम्हालू इति, कौटजं फलम्=इन्द्रजौ इति, करञ्जद्वितयं=वल्लीकरञ्जो वृक्षकरञ्जश्चेति चिरल्वप्रकीर्यौ, मूर्वा=कुमारीवद्भवति, शोभाञ्जनकः सौंजना इति, वरुणः=वरना इति बिल्ववत्पत्रो यत्फलानि पक्वानि रक्तवर्णानि भवन्ति । अर्कपर्णम्=रविपत्रम्,पाटला=अमोघा, कण्टकारिका=क्षुद्रा, पाटलेत्यत्र पटोलमिति पाठस्तु श्लेष्मघ्नगणे विचारणीयः ॥ ३२६-३२७ ॥

अदरख, सम्भालू, इन्द्र जौ, वृक्षकरञ्ज और लताकरञ्ज, मूर्वा, सुहांजना, शिरीष, वरना, आक के पत्ते, पाडल, कण्टकारी । यह श्रृङ्गवेरादिगण कफरोग नाशक है । इसकी पुट देने से लोहा कफ के रोगों को नाश करता है ॥ ३२६-३२७ ॥

अथ गोक्षुरादिगणः—

गोक्षुरेक्षुरकौ व्याघ्री सिंहपुच्छीद्वयं स्थिरा ।

गोक्षुरादिरिति प्रोक्तो वातश्लेष्महरो गणः ॥३२८॥

गोक्षुरादिगणे—इक्षुरकः=तालमखाना इति, व्याघ्री=कण्टकारी, सिंहपुच्छीद्वयम्=पृष्टपर्णी माषपर्णी चेति व्याख्यातारः । शालपर्णी पृष्ठपर्णीति र. ज. नि. । स्थिरा=शालपर्णी स्थिराशब्दस्य गुडूची शाल्मली वा व्याख्यानन्तु तयोः पर्यायेषु स्थिराशब्दादर्शनात् हेयम् ॥ ३२८ ॥

गोखुरू, तालमखाना, छोटी कटेली, दोनों प्रकार की पृष्टपर्णी दीर्घ पत्र वाली और गोल पत्र वाली, शालपर्णी; यह गोक्षुरादिगण वातश्लेष्महर है । इन से लोहे को पुट दें तो वातश्लेष्मज रोगों का नाश होता है ॥ ३२८ ॥

अथ पटोलादिगणः—

पटोलपत्रकोशीरकासमर्दापराजिताः ।

लोध्रेन्दीवरकल्हार-वाराहीकान्तया सह ।

पटोलादिरिति ज्ञेयः पित्तश्लेष्मगदापहः ॥ ३२९ ॥

पटोलादिगणे—अपराजिता=विष्णुक्रान्ता, इन्दीवरम्=नीलकमलम्, कल्हारम्=रक्तोत्पलम्, वाराही=वाराहीकन्दः (गेठी), कान्ता=प्रियङ्गुः ॥ ३२९ ॥

पटोलपत्र, खस, कसौंदी, कोयल, लोध, नीलोत्पल, कुमुद, वाराहीकन्द, प्रियंगु; यह पटोलादिगण पित्तश्लेष्महर है । इनसे लोहे को पुट दें तो यह पित्तश्लेष्मज रोग दूर करता है ॥ ३२९ ॥

अथ किंशुकादिगणः—

किंशुकः काश्मरी विश्वमग्निमन्थस्त्रिकण्टकः ।

श्योनाकः शालपर्णी च सिंहपुच्छीद्वयं स्थिरा ॥३३०॥

पाटला कण्टकारी च बृहती बिल्व एव च ।

किंशुकादिगणो ह्येष दोषत्रयहरो मतः ॥ ३३१ ॥

किंशुकादिगणे--किंशुकः=पलाशः ढाक इति, काश्मरी=कुम्हार इति, विश्वम्=शुण्ठी,अग्निमन्थः=अरणिः,त्रिकण्टकः=गोक्षुरः,

श्योनाकः=अरलू इति, शालपर्णी प्रसिद्धा दशमूलद्रव्यम् । र. ज. नि. तु शालपर्णीत्यत्र सप्तपर्णीति पाठः । सप्तपर्णी--समङ्गा छुईमुई इति, पाटला=पाडल इति, कण्टकारी=क्षुद्रा, वृहती=बड़ी कटेली इति, बिल्वं=बिल्वत्वक् ॥ ३३०--३३१ ॥

पलाश के फूल, गंभारी, सोंठ, अरणी, गोखुरू, अरलू, शालपर्णी, दोनों प्रकार की पृष्टपर्णी, स्थिरा, पाटला, कटेली, बड़ी कटेली, बेल की छाल, यह किंशुकादिगण त्रिदोषनाशक है । इससे लोहे को पुट दें तो त्रिदोषज व्याधियों का नाश होता है ॥३३०-३३१॥

अथ शतावर्यादिगणः—

शतावरीबलाधात्रीगुडूचीवृद्धदारक-
वानरीभृङ्गराजाख्यविदारीगोक्षुरक्षुरैः ।
वाजिगन्धाकणायुक्तैर्वाजीकर्मसु शस्यते ॥३३२॥

शतावर्यादिगणे--बला=खरेटी इति, धात्री-आमलकी, वानरी=आत्मगुप्ता=कैंच के बीज इति । भृङ्गराजाख्यः=श्वेतपुष्पभृङ्गराजः, विदारी=विदारीकन्दः,क्षुरः=तालमखाना इति, वाजिगन्धा=अश्वगन्धा, कणा=पिप्पली ॥ ३३२ ॥

शतावर, बला, आंवला, गिलोय, विधारा, कौंच, भांगरा, विदारीकन्द, गोखुरू, तालमखाना, असगन्ध, पिप्पली; ये शतावर्यादिगण वाजीकरण में अच्छा है । इससे लोहे को पुट दें तो वह लोहभस्म वाजीकरण होता है ॥ ३३२ ॥

अथ विदार्यादिगणः—

विदारीकन्दपिण्डाह्वभृङ्गराजशतावरी-
क्षीरकञ्चुकमल्लातामृतकाचित्रकैस्तथा ॥ ३३३ ॥
करिकर्णपलाशैश्च मुषलीमधुकैरपि ।
मुण्डिरीकेशराजैश्च पुटो देयो रसायने ॥ ३३४ ॥

विदारिकन्दादिगणे—पिण्डाह्व'=पिण्डतगरम्, क्षीरकञ्चुकः-शिरीषः, अमृतका=गुडूची, मधुको=मधुयष्टिः, मुण्डिरी=घुण्डी इति, केशराजो=द्वितीयभृङ्गराजः ॥ ३३३-३३४ ॥

विदारीकन्द; पिण्डतगर, भांगरा, शतावर, खिरनी, भिलावा, गिलोय, चीतामूल, हस्तिकर्णपलास, मूसली, मुलहठी, मुण्डी, केशराज; इनसे लोहे को पुट दें तो यह रसायन होता है ॥ ३३३-३३४ ॥

सामान्ये च विशेषे च पुटे यद् यत् प्रकीर्तितम् ।
मिलितैरेकशो वा तैर्यथेष्टं पुटयेत् ततः ॥
पुटपाके फलादीनामयसा ग्रहणं समम् ॥ ३३५ ॥

पुटविधाने विशेषमाह सामान्य इति---सामान्ये पुटे-त्रिफलादि-पुटे, विशेषे-एरण्डादिपुटे यत् यत् त्रिफलादि, एरण्डादि वा प्रकीर्तितमुक्तं तै मिलितैः=संयुतैः, एकशः, एकैकेन यथालाभ-मिलितेन वा यथेष्टं यथेच्छं पुटयेत् । पुटपाके फलादीनां=त्रिफला-दीनामयसा=लोहेन समं=तुल्यमानं, ग्रहणं कर्तव्यम् । स्वरस-सत्त्वे स्वरसेनैवायसचूर्णं पङ्कोपमं विधेयम् । क्वाथादिना यथा

पञ्चपललौहस्य पुटपाके कर्तव्ये पञ्चपलद्रव्यस्य क्वाथः करणीय इति भावः ।

शार्ङ्गधरस्य दीपिकायां पातञ्जलोद्धृते लौहकल्पे दोषभेदेन व्याधिभेदेनापि पुटौषधानि दत्तानि । म.ख.अ.११.श्लो ४८ ॥३३५॥

लौहसर्वस्वे प्रयोजनवशात्पुटपाके प्रयोज्या वनस्पतयः ।

वरा शिग्रुपलाशेभकर्णभृङ्गद्रवाम्भसा ।
अत्रोत्तरे पुनर्दद्याद्भयसस्त्रिफलापुटान् ॥५६॥
तद्वानाद्वद्धकोष्ठस्य लोहं स्यादनुलोमनम् ।
स्मृतः पिप्पलितोयेन मन्दाग्नेरग्निवृद्धये ॥
विदारीगरिणा क्लैब्येऽरुचौ जम्बीरवारिणा ।
शिरीषतोयैवर्ण्ये वाते वाट्यालकाम्भसा ॥
पित्ते पर्पटतोयेन मरिचार्द्राम्बुना कफे ।
दशमूलीकषायेण सन्निपातोद्भवे गदे ॥
किराततिक्ततोयेन ज्वरेषु विषमेषु च ।
गुडूचीवारिणा मेहेऽतिसारे कुटजाम्भसा ॥
ब्रह्मयष्ट्यम्भसा श्वासे कासे वासकवारिणा ।
काकोदुम्बरिकातोयै रक्तपित्तप्रशान्तये ।
पाण्डुत्व महिषीमूत्रैः कृमौ जन्तुघ्नतण्डुलैः ॥
कुष्ठे विडङ्गभल्लातैः प्लीह्नि रोहितकाम्भसा ।
सिन्दुवारद्रवैर्मूत्राघाते शूले तुषोदकैः ॥
पामादद्रुविचर्चीषु दद्याद्दद्रुघ्नवारिणा ।
मुशलीवारिणाऽर्शस्सु हृद्रोगेर्जुनवारिणा ॥

आमवातप्रशान्त्यर्थमुच्चटामूलजैर्द्रवैः ।
सोमराजी.....दकैः ॥
शिग्रोर्द्वेदाम्बुनाऽश्मर्यामुदावर्त्ते त्रिवृज्जलैः ।
गुल्मेऽम्लदाडिमाम्भोभिर्ब्राह्मीतोयैः स्वरक्षये ॥ ६५ ॥
वाजिगन्धाजटातोयैः राजयक्ष्मनिवृत्तय-इति ।

पुट देने के लिए सामान्य और विशेष गुणों में जो २ द्रव्य लिखे हैं उन्हें मिलाकर या अकेले यथेष्ट पुट देनी चाहियें । पुटपाक में त्रिफला आदि को लोहे के समभाग लेना चाहिये ।

यदि मिलाकर द्रव्यों से पुट देनी हों तो मिलित द्रव्यों को समभाग मिलाकर लोहे के समपरिमाण लें । यदि एक २ द्रव्य से पुट देनी हो तो वह भी परिमाण में लोहे के समान ही होना चाहिये ॥ ३३५ ॥

अथ पुटपाकप्रकरणमाहः—

हस्तमात्रमिते गर्ते करीषेणार्द्र पूरिते ।
अथवा तुषकाष्ठाभ्या पूरितेऽर्धे निधापयेत् ।
लौहमग्निं ततो दत्त्वा तथैवोर्ध्वं प्रपूरयेत् ॥ ३३६ ॥
दिवा वा यदि वा रात्रौ विधिनानेन पाचयेत् ।
चतुर्भिः प्रहरैरेव पुटपाकेन मारयेत् ॥ ३३७ ॥
पुटपाके क्षणादूर्ध्वं स्थितो भवति भस्मसात्
अधस्तादपकृष्टस्तु मन्दो भवति वीर्य्यतः ॥ ३३८ ॥

कुण्डस्थो भस्मना च्छन्न आक्रष्टव्यः सुशीतलः।
समाकृष्टस्य तप्तस्य गुणहानिः प्रजायते ॥ ३३६ ॥

पुटप्रकारमाह—हस्तेति—हस्तमात्रमिते=हस्तप्रमाणमस्येति प्रमाणे द्वयसच्—इत्यादिना मात्रच् प्रत्ययः। मात्रच् प्रत्ययेनैव परिमाणार्थे सिद्धे मितशब्दः सर्वतो हस्तैकपरिमाणं सूचयति, तेन हस्तमितगम्भीरे तथाऽनाहपरिणाहे च गर्त्ते=अवटे करीषेण=वन्योपलेन जातावेकवचनं तेन करीषैरित्यथः। गृहकरीषैः कृत्रिमैरपि पुटने न दोषः, अथवा करीषाभावे तुषकाष्ठाभ्यां=तुषेण काष्ठेन च कोकिलैरपि सर्वैर्मिलितैर्वा ज्ञेयम्। अद्यत्वे तु सौकर्यार्थं विद्युत्तापेनापि पुटं दीयते। अर्धपूरिते लौहं=लौहसम्पुटं निधापयेत्। ततोऽग्निं दत्त्वा तथैव पूर्वोक्तप्रकारेण करीषादिभिरूर्ध्वं=गर्त्तस्य शेषभागं प्रपूरयेत् ॥ ३३६ ॥

दिवेति--चतुर्भिः प्रहरैरिति न कालनियमो भस्मना च्छन्ने गर्त्तमुखे त्रिदिनान्तमपि तिष्ठति वह्निः। एव शब्दः पादपूरणार्थ इति केचित्। वस्तुतस्तु--एव शब्दो नियमार्थस्तेन चतुःप्रहरान्न न्यूनकालं नाधिकमित्यन्ये ॥ ३३७ ॥

पुटनीयं द्रव्यं गर्त्तमध्य एव स्थापनीयं नाधो नोपरि इत्यत आह पुटपाक इति। ऊर्ध्वं गर्त्तमुखे स्थितो लौहादिः क्षणाद्भस्मसाद्भवति, तन्न गुणाय। अधस्ताद्गर्त्ततले अपकृष्टाऽधःस्थित इत्यर्थः, वीर्यतो मन्दो भवति अतो गर्त्तस्य मध्य एव पुटनीयं स्थाप्यम् ॥ ३३८ ॥

पुटात्स्वाङ्गशीतमेव ग्रहीतव्यमित्याह—कुण्डस्थ इति-भस्मनाच्छन्न इति यदा हि अग्निर्निर्धूमतां याति तदा गर्त्तमुखे द्व्यङ्गुलं

सर्वतो गर्त्तं भस्मनाच्छादनीयम्। सुशीतलश्च सम्पुट आक्रष्टव्यो=ग्रहीतव्यः। तप्तस्य समाकृष्टस्य गुणहानेः।

प्रक्रिया चेत्थम्—स्थालीपाकानन्तरं जलेन प्रक्षाल्य लौहं खल्वे मसृणं मर्दयित्वा पुटनौषधस्वरसेन हिमेन क्वाथेन वा चक्रिकानिर्माणयोग्यं विधाय मसृणे काष्ठफलके चक्रिका-निधाय दिनमेकमातपे शोषयित्वा सम्पुटितं गर्तमध्ये निधाय--उपर्यपि करीषाणि दत्त्वाऽग्निं प्रज्वाल्य ज्वलिते निर्धूमे चाग्नौ द्व्यङ्गुलं सर्वतो भस्मनाऽऽच्छादयेत् तापरोधार्थम्। स्वाङ्गशीतलं सम्पुटं विभिद्य पुनरपि लौहखल्वे मर्दनपुटनादिकं तावद्विधेयम् यावच्चूर्णीकृतं लघुत्वेन स्थिरे जले हंसवत्तरति। एवं कज्जलनिभं नेत्रे निहितं मनागपि पीडां न करोति। अस्मत्सम्प्रदाये तु-शुष्काश्चक्रिका गोमयान्तः कृत्वा गोलकान्विधाय शोषयित्वा गर्त्ते पुटनम्। इत्थं प्रतिपुटं गोमयरसेन भानुपाकश्च भवति। अत्र च मृदुताङ्गतस्य लोहस्य हानिरपि सम्भवति। प्रथमं कतिचित्पुटेषु न हानिसम्भावना ॥ ३३९ ॥

एक हाथ लम्बा एक हाथ चौड़ा तथा एक हाथ गहरा गोल गढ़ा खोदकर उसके आधे भाग में जंगली उपले अथवा तुष और लकड़ियां भर दे। उस पर लोहयुक्त शरावसम्पुट रख तब अङ्गारे आदि से आग की योजना कर गढ़े को उपले वा तुष और लकड़ियों से भर दे। इच्छानुसार दिन या रात में इसी विधि से पकाना चाहिये। इस प्रकार १२ घन्टे में पुटपाक करे। पुटपाक में यदि सम्पुट को कुण्डके ऊपर रखें तो जल्दी ही औषध

जल जाती है और नीचे डालें तो आंच कम लगती है। अतएव कुण्डके मध्य में डालने का विधान है। जब उपले जल जांय उस समय चारों तरफ से आंच की रक्षा के लिए राख से ढक देते हैं। फिर स्वांग शीतल निकाल ले। सम्पुट को गरम कुण्ड से निकालने पर गुण नहीं होता ॥ ३३५-३३६ ॥

भतान्तरम्—

शुद्धस्य सूतराजस्य भागो भागद्वयं बलेः ।
द्वयोः समं लौहचूर्णं मर्दयेत् कन्यकाद्रवैः ॥ ३४० ॥
यामद्वयं ततो गोलं स्थापयेत् ताम्रभाजने ।
आच्छाद्य रण्डजैःपत्रैरुष्णो यामद्वयाद्भवेत् ॥ ३४१॥
त्रिरात्रं धान्यराशिस्थं तत्ततो मर्दयेद् दृढम् ।
रजस्तद्वस्त्रगलितं नीरे तरति हंसवत् ॥
तीक्ष्णं मुण्डं कान्तलौहं निरुत्थं जायते मृतम् ॥३४२॥

पुटनं विनापि रसयोगेनोत्तमं लौहभस्माह—शुद्धस्येति-सूतराजस्य=सूतस्य भाग=एकोभागः, बले=गन्धस्य भागद्वयं शुद्धस्येत्येव द्वयोः कज्जलीं विधाय द्वयोः समं=भागत्रयम्, लौहचूर्णं=शुद्धं सूक्ष्मरेतितम्। लौहस्थाने सारस्तीक्ष्णं वेति पाठान्तरे। दत्त्वा कन्यकाद्रवैः=कुमारीस्वरसैः, यामद्वयं=दिनार्धं मर्दयेत्। शार्ङ्गधरे तु-ततः कन्याद्रवैर्घर्मे त्रिदिनं परिमर्दयेत् इति त्रिदिनमर्दनमुक्तम्। ततो गोलं विधाय, ऐरण्डजैः पत्रैर्गोलमाच्छाद्य=परितः सम्यगावेष्ट्य-ततः सूत्रेण सम्बध्य ताम्रभाजने=ताम्रसम्पुटे 'स्थापयेत्ताम्रसम्पुटे'।

इति लौहप्रकरणे यो. र. पाठात्। 'ताम्रसम्पुटे धान्यराशौ स्थापयेदिति' शा. ध. गु. टी. च। तदनु--'उष्णो यामद्वयाद्भवेदि' त्युक्तेः, यामद्वयं खरतरघर्मे स्थापन मायातम्। ततस्तदुष्णमेव त्रिरात्र=महोरात्रत्रयम्। कालाध्वनो रत्यन्तसंयोगे द्वितीया। धान्यराशिस्थं 'मध्ये धान्यकुशूलस्य त्रिदिनं स्थापयेद्बुधः' शा. ध. म. ख. १२-२७८। धान्यराशिश्च तावती ज्ञेया यत्रोष्णताहानिर्न भवेत्परं वृद्धिः स्यात्पुटपाकाय। ततः समादाय दृढं=मसृणं मर्दयेत्। शा. ध.-तु-कुटारछिन्नादिरसै र्मर्दनं भावना चाधिकाऽभिहिता। ततो वस्त्रगलितं=पटघृष्टं नीरे=जले हंसवत्तरति। प्रकारेणानेन तीक्ष्णादिलौहं मृतं सन्निरुत्थमपुनर्भवं जायते। र.र. स. तु-'स्वर्णादीन्मारयेदेवं चूर्णं कृत्वा तु लौहवत्' ५-१३३। एवं सर्वाणि लौहानि स्वर्णादीन्यपिमारयेत् शा. ध. म. ख. ११-५२ च ॥ ३४२ ॥

शुद्ध पारा एक भाग, शुद्ध गन्धक दो भाग और शुद्ध बारीक लोहचूर्ण तीन भाग ले सबको घीकुमारी के रस से दो पहर घोट गोला बना गोले पर एरण्डपत्र लपेट सूत के तागे से बांध गोले को ताम्रसम्पुट में रख दो पहर तेज धूप में गरम कर फिर इसे तीन दिन धान्यों के ढेर में रखे और पश्चात् निकाल दृढ़ता से मर्दन कर कपड़े में छान ले यह लोहे की भस्म जल पर हंस की तरह तैरेगी। इस प्रकार से तीक्ष्ण मुण्ड वा कान्तलौह की निरुत्थ भस्म हो जाती है ॥ ३४०-३४२ ॥

मतान्तरम्—

क्षिपेद्वा द्वादशांशेन दरदं तीक्ष्णचूर्णतः ।

कन्यानीरेण सम्मर्द्य यामयुग्मञ्च सम्पुटेत् ।
एवं सप्तपुटैर्मृत्युं लौहचूर्णमवाप्नुयात् ॥ ३४३ ॥

(इति पुटपाकविधिः)

हिंगुलयोगेनोत्तमं भस्माह--क्षिपेदिति-तीक्ष्णचूर्णतः=लोहचूर्णतः, तीक्ष्णपदं लोहमात्रस्योपलक्षणम् । द्वादशांशेन=एको भागो दरदस्य द्वादशभागा लौहचूर्णस्य, कन्याजलेन यामयुग्मं सम्मर्द्य सम्पुटेत् । सप्तभिः पुटै र्लौहं मृत्युमपुनर्भवमवाप्नुयात् ।

लौहभस्मनः सरलं प्रकारद्वयम्—

परिप्लुतं दाड़िमपत्रवारा लौहं रजः स्वल्पकटोरिकायाम् ।
म्रियेत वस्त्रावृतमर्कभासा योग्यं पुटैः स्यात्त्रिफलादिकानाम् ॥
लौहचूर्णं पलं खल्वे सोरकस्य पलं तथा ।
अच्छगन्धपलं चापि सर्वमेकत्र मर्दयेत् ॥
कुमार्यद्भिर्दिनं कुर्याद्गोलकं रुबुपत्रकैः ।
संवेष्ट्य च मृदा लिप्त्वा पुटेद् गजपुटे भिषक् ॥
स्वाङ्गशीतंसमुद्धृत्य सिन्दूराभमयोरजः ।
मृतं वारितरं ग्राह्यं सर्वकार्यकरं परम् ॥

आ. वे. प्र. २५८-२६१ ।

लौहमारणस्य सरलं प्रकारद्वयम्-टीकाकृतः—शुद्धं लौहं जम्बूत्वक्काथेनाप्लुत्य काचपात्र आतपे स्थापयेदालोडयेच्च प्रत्यहम् । पङ्कोपमे जाते पुटेत् । एवमर्धांश नरसारयुतं जलाप्लुतं लौहे दृषदि स्थापयेदालोडयेच्च पुनः पुनः, काले जलं पुनरपि देयम् । पङ्कोपमे जाते त्रिफलादिना पुटेत् ॥ ३४३ ॥ इति पुटपाकः ।

तीक्ष्णलौहचूर्ण बारह भाग, शुद्ध शिंगरफ एक भाग, दोनों को घीकुमारी के रस से दो पहर घोट सम्पुट में रख गजपुट में फूंक दे । इसप्रकार सात वार शिंगरफ और घीकुमार में घोट पुट देने से सात पुट में लौहचूर्ण भस्म हो जाता है ॥ ३४३ ॥

अथ लौहस्य निरुत्थीकरणम्—

सर्वमेतन्मृतं लौहं पक्तव्यं मित्रपञ्चकैः ।
यद्येवं स्यात् निरुत्थश्च सेव्यं रक्तिचतुष्टयम् ॥३४४॥

निरुत्थपदाभिधेयाम्-मृतधातुपरीक्षामाह सर्वमिति-मृतं लौहं मित्रपञ्चकैः समानमानैः गजपुटे पक्तव्यम् । एवं यदि निरुत्थं नाम लौहं पुनर्न सम्भवेत् किन्तु भस्मैव स्यात् तदा मृतं विद्यात् तस्य मात्रा रक्तिचतुष्टयम् । अद्यत्वे तु ३-२. र. ॥ ३४४ ॥

सब लोहे की भस्मों को मित्रपञ्चक से मिला पकाना चाहिये । यदि इस प्रकार से लोहा अपने स्वरूप में न आय तो निरुत्थभस्म समझे । इस लौहभस्म को चार रत्ति तक मात्रा है ॥ ३४४ ॥

अथ मित्रपञ्चकम्—

मधु सर्पिस्तथा गुञ्जा टङ्कणं गुग्गुलुस्तथा ।
मित्रपञ्चकमेतत्तु गणितं धातुमेलने ॥ ३४५ ॥

मित्रपञ्चकमाह—मध्विति-सर्पि=र्गोघृतम् । एतन्मित्रपञ्चकं धातुमेलने=धातूनां परस्परसंयोगकरणे-पुनरुज्जीवने च, भस्मस्था अमृता धातुकणा मित्रपञ्चकयोगेन ध्माता द्रुताः परस्परं मिलन्ति, गणितं=संख्यातम् । सर्वं समानमानं ग्राह्यम् । द्रावकाः

प्राक् (अ. १-१०६) कथिताः तत्र गुग्गुलुस्थाने गुड़ोऽस्ति। क्वचित्-गुड़गुगुलुसौभाग्यलाक्षामधुभिर्मित्रपञ्चकमुक्तम् ॥ ३४५ ॥

शहद, घी, रत्तियां, सुहागा, गूगल; ये पांचो मित्रपञ्चक हैं। ये धातुओं के मिलाने के काम में आते हैं ॥ ३४५ ॥

मतान्तरम्--

गोघृतं गन्धकं लौहं तप्तखल्वे विमर्दयेत्।
दिनैकं कन्यकाद्रावै रुद्ध्वा गजपुटे पचेत्।
इत्येवं सर्वलौहानां कर्त्तव्यं स्यात् निरुत्थितम् ॥३४६।

अपि च—यदि मित्रपञ्चकैः पक्वमनिरुत्थं स्यात्तदा निरुत्थीकरणमाह-गोघृत मिति। सर्वं समानमानं तप्तखल्वे मर्दनानन्तरं कन्याद्रावैरेकं दिनं मर्दयित्वा गजपुटे पचेत्। सर्वलौहानां=स्वर्णादीनामित्येवमुक्तप्रकारेण। लौहप्रकरणे पठितस्यापि सर्वधातुष्वतिदेशः।

अन्यच्च--मध्वाज्यं मृतलौहं च सरूप्यं सम्पुटे क्षिपेत्।
रुद्ध्वा ध्माते च संग्राह्यं रूप्यं वै पूर्वमानकम् ॥
तदा लौहं मृतं विद्यादन्यथा मारयेत्पुनः ॥आ.वे.प्र.११-२६४ ॥
गन्धकेनोत्थितं लौहं तुल्यं खल्वे विमर्दयेत्।
दिनैकं कन्यकाद्रावैरुद्ध्वा गजपुटे पचेत् ॥
इत्येवं सर्वलौहानां कर्तव्येयं निरुत्थितिः ॥
द्विगुणे त्रिफलाक्वाथे तुल्ये पिष्ट्वाऽप्ययोरजः।
विपचेन्मध्यपाकेन सर्वव्याधिजरापहम् ॥
इत्यमृतीकरणं तत्रैव ॥ ३४६ ॥

गौ का घी, शुद्ध गन्धक, लौहभस्म; सबको तप्तखरल में डाल मर्दन कर अच्छी प्रकार मिलने पर नीचे उतार घीकुमार के रस से दिनभर घोट शुष्क करले और सम्पुट में रख गजपुट में फूंक दे। इसप्रकार से सब लोहों का निरुत्थीकरण हो जाता है ॥३४६॥

रसायने विशेषो यथा—

मर्दयेच्च लौहभस्म गुञ्जामध्वाज्यटङ्कणैः।
धमेद्वह्नौ पुनर्लौहं तदा योज्यं रसायने ॥ ३४७ ॥

निरुत्थीकृतस्यापि रसायनार्थं पुनः पुटनमाह मर्दयेदिति-गुञ्जादिभि लौहसमैः पुनः वह्नौ पुटनं तदनु रसायने योज्यम् ॥ ३४७ ॥

लोहभस्म को गुञ्जा, मधु, घी और सुहागे से मर्दन कर आग में धौंकनी से धौंके। तो फिर इसे रसायनकर्म में प्रयुक्त करे ॥३४७॥

गुणाः—

कृष्णायः शोथशूलार्शक्रिमिपाण्डुत्वशोषनुत्।
वयस्यं गुरु चक्षुष्यं सर्वमेदोऽनिलापहम् ॥ ३४८ ॥

इत्थं मारितस्य लौहस्य गुणानाह-कृष्णेति-शोषः=क्षयः, वयस्यं=वयसे हितं वयस्यमायुष्यम्, चक्षुष्यं चक्षुर्भ्यां हितम्, सर्वमेदोऽनिलापहं-तत्तदनुपानैः तत्तद्योगैश्च सर्वेषां मेदोरोगाणां सर्वेषामनिलरोगाणां वातरोगाणामपहं नाशकम् ॥ ३४८ ॥

कृष्णलोहभस्म, शोथ शूल बवासीर क्रिमिरोग, पाण्डुरोग और शोषरोग को नष्ट करता है। आयुवर्धक है, भारी है, आंखों के लिये हितकारी है। सब प्रकार के मेद और वायु को नष्ट करता है ॥ ३४८ ॥

आयुःप्रदाता बलवीर्य्यकर्त्ता रोगापहर्त्ता मदनस्य कर्त्ता।
अयःसमानं नहि किञ्चिदस्ति रसायनं श्रेष्ठतमं नराणाम्॥३४९॥

अन्यसम्वादेन गुणानाह-आयुरिति-आयुर्जीवितं तस्य प्रदाता बर्द्धक इत्यर्थः। मदनस्य=कामस्य। अयःसमानं=अयसा लोहेन समानं=तुल्यं श्रेष्ठतमं=सर्वप्रधानं नराणामिति-प्राणिमात्रस्योपलक्षणम्, रसायनं=जराव्याधिविध्वंसि, हीति=निश्चयेन किञ्चिन्नास्ति रोगविशेषे लौहविशेषप्रयोगस्तु-लो.स.१२-१९तो ज्ञेयः।

प्रयुक्तं लौहं पक्वामाशययोर्विपच्य तत्कलाङ्कुरैः सात्म्यीकृतं रसेन सह यकृत्प्लीह्नोः कफग्रन्थीनां च बलमाधाय पुना रक्ताणून् सबलीकृत्य वर्धयति रक्तं पोषयति सकलं शरीरं, क्षुत्करोति, पाण्डुकामलादिकारणं यकृत्प्लीहरोगञ्चापहन्ति। ततश्च हृदययकृत्प्लीहवृक्कादिविकृतिजं शोथमप्यपाकरोति, किं बहुना-कृशं स्थूलं वा स्वावस्थामानयति त्रिकटुत्रिफलादियोगेन मलं मूत्रं च स्वमाने स्थापयति शोभयति च। मात्रा ½ २. र.।

त्रिफलामधुना च सर्वरोगेषु युज्यते त्रिफलामात्रा च यया कोष्ठशुद्धिर्भवेत्। तदनु मुस्तकचर्वणं विधेयं लौहसर्वदोषहरत्वात्।

बद्धकोष्ठे च—तप्तदुग्धानुपानं प्रायः सारयति बद्धकोष्ठस्य।
अनुपीतमम्बु यद्वा कोमलशस्यस्य नारिकेलस्य।
यस्य न तथापि सरति सयवक्षारं जलं पिबेत्कोष्णम्।
कोष्णं त्रिफलाक्वाथं क्षारसनाथं ततोऽप्यधिकम्॥
र. इ. चि. अ. ८. श्लो. १९१-१९२।

अत्र लौहसर्वस्वात्—

अथौषधात् षष्टिगुणं च दुग्धं धारोष्णमर्धोदकसाधितं वा॥
पिबेदनुष्णं त्वथ सात्म्यतो वा क्षीरोक्तमात्रं स्वरसं गुडूच्याः॥
फलत्रिकेण क्वथितं जलं वा क्षौद्रेण वा गोजलमेव सिद्धम्॥
तथा यथारोगहरप्रयोगनिष्क्वाथकल्काम्बु निजद्रवान् वा॥१४०॥
रास्नाम्बु वाते कफजे कणाम्बु द्राक्षाम्बु पित्ते सितयानुपेयम्॥
धात्रीजलं शर्करयाम्लपित्ते पित्तानिलेऽम्भो लघुपञ्चमूल्याः॥
या पञ्चमूली महती प्रसिद्धा तया शृतं वारि कफे सवाते॥
गदे त्रिदोषे कणया सनाथः क्वाथोऽनुपेया दशमूलसिद्धः॥
चिरोषितं जर्जरितस्य तोयं किरातितक्तस्य कणान्वितस्य॥
ज्वरेऽनुपेयं प्रबलेऽतिसारे कृताञ्जलिः स्वाङ्गसमुद्भवाम्बु॥
रक्तातिसारे मधुनाऽनुपेयः स्वाङ्गद्रवो हिज्जलपल्लवानाम्॥
श्रीवृक्षमाकन्दकजास्थिसारो मधुप्लुतश्छर्द्यतिसारके च॥
शोथातिसारे च तथा ग्रहण्यां शुण्ठीरजो वा दशमूलतोयम्॥
सामे तथा शुण्ठ्यमृताम्बु कोष्णं पुनर्नवाम्भोऽनुपिबेच्च शोथे॥
कृमौ च जन्तुघ्नपलाशबीजकल्कोद्भवं वारि मधुप्रगाढम्॥
क्लैब्ये विदारीस्वरसं सिताढ्यं निजाम्बु दुर्नामनि तालमूल्याः॥
श्वासेऽम्बु कोष्णं समविश्वभार्ग्यं वासाम्बुकासे मधुनाऽनुपेयम्॥
पित्ते सरक्ते मधुशर्कराढ्यं सुशीतलं फल्गुफलोद्भवाम्बु॥
मूत्रग्रहेऽम्भस्तृणपञ्चमूल्या गुडूचिकाम्भः समधु प्रमेहे॥
सुधायवक्षारयुतं कटूष्णमम्भोऽनुपेयं जठरामयेषु॥
जम्बीरजं वारि रुचिप्रणाशे मन्दानले चित्रकसिद्धमम्बु॥

भजति यदि सदोर्ध्वं सप्तकादेकविंश-
दिदममृतसमानं ब्रह्मचर्यं विनाऽपि ।
बलिपलितविहीनश्चन्द्रतारार्कजीवी,
कनकरुचिरकान्तिर्नागवीर्यस्ततःस्यात् ॥ १६६ ॥

इति शुद्धायसविधिः ॥ ३४९ ॥

लोहा आयु देने वाला, बल-वीर्य कारक, रोग--नाशक और कामोत्तेजक है। लोह की भस्म के समान अन्य कोई रसायन मनुष्यों के लिये उत्तम नहीं है ॥ ३४९ ॥

लौहसेवने वर्जनीयानि—

कूष्माण्डं तिलतैलञ्च रसोनं राजिकां तथा ।
मद्यमम्लरसञ्चैव त्यजेत् लौहस्य सेवकः ॥३५०॥

लौहसेवने वर्ज्यानाह—कूष्माण्डमिति-राजिका लघ्वी ज्ञेया, मद्यं=सुरादि, अम्लरसं=काञ्जिकादि, रसोनमत्र माषान्नमिति रसं चैवेत्यत्र मसूरांश्चेति पाठान्तरम् ।

लौहस्य सम्यक् परिपाके च-कालेमलप्रवृत्तिर्लाघवमुदरे विशुद्धिरुद्गारे ।
अङ्गेषु नावसादो मनःप्रसादोऽस्य परिपाके ॥

लौहदोषे च—कृमिरिपुसहितं लीढं सहितं स्वरसेन वङ्गसेनस्य ।
क्षपयत्यचिरान्नियतं लौहाजीर्णोद्भवं शूलम् ॥
आरग्वधस्य मज्जाभी रेचनं किट्टशान्तये ।
भवेद्यद्यतिसारश्च पीत्वा दुग्धं तु तं जयेत् ॥
आ. वे. प्र. ११-२२०-२२१ ।

लौहस्य विशेषयोगाश्च-नवायस, त्र्यूषणादि, लौहपर्पटी, पुटपक्व-

विषमज्वरान्तकलौह, बृहत्सर्वज्वरहरलौहादयः ॥ ३५० ॥

पेठा, तिल का तेल, लशुन, राई, मद्य, खटाई; इन सब को लौहभस्म का सेवन करने वाला छोड़ दे ॥ ३५० ॥

अथ वज्रपाण्ड्यादिगुणाः—

सामान्याद् द्विगुणं क्रौञ्चं कालिङ्गोऽष्टगुणस्ततः ।
कलेः शतगुणं भद्रं भद्राद्वज्रं सहस्रधा ॥ ३५१ ॥
वज्राच्छतगुणं पाण्डि निरङ्गं दशभिर्गुणैः ।
ततः कोटिसहस्रैर्वा कान्तलोहं महागुणम् ॥ ३५२ ॥
(इति लौहमारणम्)।

लौहानामपि परस्परं गुणवैशेष्यमाह सामान्यादिति—क्रौञ्च, कालिङ्ग (कलि), भद्र, वज्र, पाण्डि, निरङ्ग कान्ताः लौहविशेषाः । लक्षणान्येषां खनिजपरीक्षायां दत्तानि ।

कान्तलौहस्य सर्वापेक्षया प्राशस्त्यम् कोटिसहस्रैरपरिगणितैरित्यर्थः ॥ ३५१-३५२ ॥

सामान्य लोहे से दुगुना क्रौञ्च लोह, क्रौञ्च से आठ गुना कालिङ्ग लौह, कालिंग से सौ गुणा भद्रलौह, भद्रलोह से हज़ार गुणा वज्रलौह, वज्रलौह से सौ गुणा पाण्डिलौह, पाण्डिलौह से दस गुणा निरङ्गलौह तथा निरङ्गलौह से भी हज़ारों करोड़ गुणा कान्तलौह उत्तम है ॥ ५१-३५२॥

विशेषतश्च---सम्यगौषधकल्पानां लौहकल्पः प्रशस्यते ।

मृतानि लौहानि रसीभवन्ति ।
निघ्नन्ति युक्तानि महामयांश्च ॥
अभ्यासयोगाद् दृढदेहसिद्धिम् ।
कुर्वन्ति रुग्जन्मजराविनाशम् ॥ र. र. स. ५-१३६ ।

लौहविषये विशेषतु-लौहसर्वस्वम् । र. प्र. सु. ४-५७ । आ. वे. प्र. ११-१६४ । र. का. धे. । भा. र. शा. प्रकरणम् २५ । र. र. स. ५-६६ । चक्रदत्तस्य रसायनम् । र. इ. चि. ८-१७३ । र. इ. चू. १४-७५ । र. त. २० । र. अ. ७-१०७ । शा. ध. म. ख. गू. टी. ११-५२ । एभ्योज्ञेयः ।

अथ मण्डूरशोधनादिः—

ये गुणा मारिते मुण्डे ते गुणा मुण्डकिट्टके ।
तस्मात्सर्वत्र मण्डूरं[1] रोगशान्त्यै प्रयोजयेत् ॥ ३५३ ॥

लौहानन्तरं तन्मलगुणानाह—ये गुणाः--इति-"ध्मायमानस्य लौहस्य मलं मण्डूरमुच्यते" लौहगुणान्मण्डूरेऽतिदिशति—मुण्ड-इति--लौहसाधारणस्योपलक्षणम् "यल्लौहं यद्गुणं प्रोक्तं तत्किट्टमपि तद्गुणम्" ॥ ३५३ ॥

जो गुण मरे हुए मुण्डलौह में हैं वे ही गुण मुण्ड के किट्ट में हैं। अतएव सर्वत्र रोगशान्ति के लिये मण्डूर का प्रयोग करे ॥ ३५३ ॥

शतोर्ध्वमुत्तमं किट्टं मध्यश्चाशीतिवार्षिकम् ।
अधमं षष्टिवर्षीयं ततो हीनं विषोपमम् ॥ ३५४ ॥

ग्राह्यमण्डूरमाह--शतेति—मण्डूरं भित्रपञ्चकैः सह ध्मातं पुनर्लौहभावंनापद्यते । न चापि चुम्बकेनाकृष्यते, नान्येनो

१. रसायनिकसूत्रं तु Fe_2O_3 ।

पायेन मण्डूरं लोहभावमापादयितुं शक्यते । शतोर्ध्वम्=शतवर्षादपि-पुराणं किट्टं=लौहमलमुत्तमं ज्ञेयम् । षष्टिवर्षहीनन्तु विषोपमं=विषसदृशं तन्मारणाय न ग्राह्यम् ॥ ३५४ ॥

सौ वर्ष से पुराना मण्डूर उत्तम होता है, अस्सी वर्ष का मण्डूर मध्यम तथा साठ वर्ष का मण्डूर अधम होता है। इससे कम वर्ष का मण्डूर विष के समान है ॥ ३५४ ॥

दग्ध्वाक्षकाष्ठैर्मलमायसन्तु गोमूत्रनिर्वापितमष्टवारान् ।
विचूर्ण्य लीढं मधुनाऽचिरेण कुम्भाह्वयं पाण्डुगदं निहन्ति ॥

मण्डूरस्य शोधनं प्रयोगञ्चाह—दग्ध्वेति--अक्षकाष्ठैः=बिभीतक-काष्ठैरायसं=लौहसम्बन्धि, मलं=किट्टम्, दग्ध्वा=अङ्गारसमानं कृत्वा, अक्षपात्रस्थगोमूत्रेऽष्टवारं निर्वापितम्-"तप्तस्याप्सु विनिक्षेपो निर्वापः स्नपनञ्च तत्" र. र. स. ८-५१. । शुद्धं भवेत् । यत्र च बिभीतककाष्ठाभावः तत्र गोमूत्रयुतवराकषाये निर्वापयेत्, अङ्गारेषु च अक्षफलत्वक्प्रक्षेपः कार्यः । ततस्तद्विचूर्ण्य लौहखल्वे लौहदण्डेन मसृणीकृत्य मधुना लीढं मास्वादितं प्रातर्निरन्नोदरे द्विरक्तिमात्रया धारोष्णदुग्धानुपानेनेति शेषः । शा. ध. तु-सप्तवारनिर्वापणानन्तरं द्विगुणत्रिफलाक्वाथेन वह्नौ भर्जनमभि-हितम् । कुम्भाह्वयं पाण्डुगदम्=कुम्भकामलां पाण्डुरोगं चाऽचिरेण=स्वल्पकालेनैव निहन्ति । सर्वत्र यकृत्प्लीहरोगेषु रक्ताल्पतायाञ्चास्य प्रयोगो बालयकृद्रोगे च विशेषेण भवति । प्रसिद्धयोगाश्च-हंसमण्डूर-पुनर्नवामण्डूरादयः । प्रायोऽस्य शोधनानन्तरमेव मधुघृतत्रिफलादिना मसृणतरं कृत्वा प्रयोगो भवति न पुटनमिति वृद्धव्यवहारः ।

पुटने तु—त्रिफलाकुमारस्नुगर्कदुग्धेषु पुटेत्त्रिधा । र. सारः । इत्यधिकस्याधिकं फलम् । वंश रोत्पन्नरसेन दद्यात्पुटानि मण्डूररसे शतञ्चेत् । लौहस्य भस्माप्यधरीकरोति,इति तत्रैव ॥३५५॥

मण्डूर को बहेड़े की लकड़ी की आग पर लाल करके गोमूत्र में आठ बार बुझावे। उसे चूर्ण करके मधु के साथ मिलाकर चाटे तो कुम्भकामला और पाण्डुरोग शीघ्र नष्ट होता है ॥३५५।

किट्टाद्दशगुणं मुण्डं मुण्डात्तीक्ष्णं शताधिकम् ।

तीक्ष्णाल्लक्षगुणं कान्तं भक्षणात्कुरुते गुणम् ॥३५६॥

किट्टापेक्षया मुण्डादीनां विशेषमाह– किट्टेति-शताधिकं=शतगुणाऽधिकफलदम् । मण्डूरोत्पूत्तिक्रमे क्रमे-लोहापेक्षया मण्डूरे प्राणवायोराधिक्यं जायते, मानमा तुलनायां मण्डूरस्य मूलापेक्षया वर्द्धितं भवति ॥ ३५६ ॥

मण्डूरकी अपेक्षा दश गुणा अधिक मुण्डलौह-भस्म, मुण्ड से सौ गुणा तीक्ष्णलौह की भस्म, तथा फौलाद से लाख गुणा अधिक कान्तलौह की भस्म खाने से गुण करती है ॥ ३५६ ॥

अथ सर्वधातुमारणविधिः—

नागैः सुवर्णं रजतञ्च ताप्यैर्गन्धेन ताम्रं शिलया च नागम् ।

तालेन वङ्गं त्रिविधञ्च लौहं नारीपयो हन्ति च हिंगुलेन ॥३५७॥

(इति स्वर्णादिशोधनमारणविधिः)

परिशेषे सर्वेषां धातूनां पूर्वोक्तमपि संक्षिप्तं मारणमाह— नागैरिति-नागैः शीशकै युतं नारीपयः सुवर्णं हन्ति, एवं नारीपयसः

सर्वत्रैवाऽनुयोगः, ताप्यैः=स्वर्णमाक्षिकेण शिलया=मनःशिलया, तालेन=हरितालेन त्रिविधं च लौहं मुण्डतीक्ष्णकान्तभेदेन, हिङ्गुलयोगस्तु लौह एव भवति । स्तन्येन लौहमारणं पूर्वानुक्तमपि र. र.स.-हिंगुलस्य पलान्पञ्च नारीस्तन्येन ५-१११, इत्यभिप्रायेणोक्तम्॥३५७॥

(इति स्वर्णादिधातुशोधनमारणम्)

स्वर्ण की भस्म सीसे से, चांदी की भस्म स्वर्णमाक्षिक से, ताम्रभस्म गन्धक से, नागभस्म मनसिल से, और वङ्गभस्म हड़ताल से, मुण्ड, तीक्ष्ण, कान्त को हिंगुल और स्त्री के दूध से मारे ॥३५७॥

अथ मणिमुक्तादिशोधनमारणम्—

स्वेदयेद्दोलिकायन्त्रे जयन्त्याः स्वरसेन च ।

मणिमुक्ताप्रवालानां यामैके शोधनं भवेत् ॥ ३५८ ॥

मणिमुक्तादिशोधनमाह—स्वेदयेदिति–दोलिकायन्त्रे=दोला एव दोलिका, स्वार्थे कः । ततः प्रत्ययस्थादिति कात्पूर्वाकारस्येत्त्वम् । दोलिकायन्त्रं=दोलायन्त्रम् (१२७ श्लो. अ.१) जयन्त्या जैंत इति भाषा, यामैके=प्रहरमात्रे स्वेदनात् मण्यादीनां शोधनं भवेत् ॥ ३५८ ॥

मणि, मोती, मूंगा आदि रत्नों को जयन्ती के पत्तों के रस में दोलायन्त्र द्वारा एक पहर स्वेदन करना चाहिये । इस प्रकार वे शुद्ध हो जाते हैं ॥ ३५८ ॥

मुक्ताफलानि शुद्धानि खल्ले पिष्ट्वा पुटेल्लघु ।

एवं भस्मत्वमाप्नोति वज्रकं काञ्जियोगतः ॥३५९॥

मुक्तावज्रयोर्मारणमाह—मुक्तेति-मुक्तोत्पत्तिस्तु-पारसीकसागरे रामेश्वरसमीपस्थे (मीनार की खाड़ी) च सागरे नातिगम्भीरे

जल शुक्तिभ्यां भवति । शुक्त्युदरस्थजीवत्वचो हि निस्सरति निर्यासवद्रसः । दैवात् तत्र प्राप्ताः कौशलेन प्रवेशिता वा सूक्ष्मशुक्तिकणास्तेन निर्यासेनावृताः कालेन मौक्तिका भवन्ति, अतः कृत्रिमाकृत्रिमयोर्विशेषं न कोपि वक्तुं शक्नोति ।

शुक्तिः शङ्खो गजक्रोडः फणिर्मत्स्यश्च दर्दुरः ।
वेणुश्चाष्टौ समाख्याताः सुज्ञैर्मौक्तिकयोनयः ॥

इति शुक्त्यतिरिक्ता अपि सप्त मौक्तिकयोनयः । काकचण्डीश्वरकल्पतन्त्रस्य मण्डूककल्पे—धातुः कोऽपि भवेदस्य मस्तके रत्नसन्निभः । ३ । इत्युक्तम् ।

लक्षणं च—ह्लादि श्वेतं लघु स्निग्धं रश्मिवन्निर्मलं महत् ।
ख्यातं तोयप्रभं वृत्तं मौक्तिकं नवधा शुभम् ॥

त्याज्यं च—रूक्षाङ्गं निर्जलं श्यावं ताम्राभं लवणोपमम् । अर्धशुभ्रं च विकटं ग्रंथिलं मौक्तिकं त्यजेत् । र. र. स. ४-१३ । मुक्ताफलानि=मोती इति ख्यातानि । लघु पुटेत्--अष्टसंख्यकवनोपलैरित्यर्थः ।

गुणाश्च—मुक्ताफलं लघु हिमं मधुरं च कान्ति-
दृष्ट्यग्निपुष्टिकरणं विषहारि भेदि ।
वीर्यप्रदं जलनिधे जनिता च शुक्ति-
दीप्ता च पक्ति रुजमाशु हरेदवश्यम् ॥
कफपित्तक्षयध्वंसि कासश्वासाग्निमान्द्यनुत् ।
पुष्टिदं वृष्यमायुष्यं दाहघ्नं मौक्तिकं मतम् ।
वारुणीयन्त्रनिःसृततरुणीकेतकीपुष्पजलेन दिनं मर्दिता

मुक्तापिष्टिर्भवति । यत्र सायं चतुर्हस्तपददाहयुतोऽल्पो ज्वरः तत्रानया ज्वरह्रासो मूत्रप्रसादश्च भवति । मुक्तायोगादपि क्षये मृगाङ्कयोगानां विशेषोपकारिता । मुक्ताविषये विशेषस्तु-र. इ. चू. १३-६ । आ. वे. प्र. १३-५० । र. प. ११७ । इत्यादिभ्यो ज्ञेयः ।

एवमिति—वज्रकं=हीरकम् । काञ्जिकयोगतः=वज्रं चूर्णयित्वा काञ्जिकेन पिष्ट्वा पुटेत् ॥ ३५६ ॥

शुद्ध मोतियों को खरल में पीसकर लघुपुट में फूंके, भस्म हो जाती है। इसी प्रकार हीरे को काञ्जी के योग से भस्म करे ॥३५६॥

मतान्तरम्—

कुमार्य्या तण्डुलीयेन स्तन्येन च निषेचयेत् ।
प्रत्येकं स सप्तवारांश्च तप्ततप्तानि कृत्स्नशः ॥३६०॥
मौक्तिकानि प्रवालानि तथा रत्नान्यशेषतः ।
क्षणाद्विविधवर्णानि म्रियन्ते नात्र संशयः ॥ ३६१ ॥

प्रकारान्तरेणाह—कुमार्य्येति-मौक्तिकादीनि तप्ततप्तानि= पुनः पुनस्तप्तानि, कुमार्य्या=घृतकुमार्य्या तण्डुलीयेन मारिषस्वरसेन स्तन्येन च सप्तवारं निषेचयेत् । अशेषतो रत्नानि=पञ्चरत्नानि क्षणान्निषेचनसमकालमेव विविधवर्णानि=अनेकवर्णानि । स्तन्येनेत्यत्र स्तुल्येनेति गतानुगतिकन्यायेन प्रचलितः पाठः । र. इ. चि, र. क. धे. अनयोः स्पष्टमेव स्तन्येन चेति पाठः ॥३६०-३६१॥

मोती, मूंगा तथा सब रत्नों को आग में गरम कर घीकुमार के रस, चौलाई के रस तथा स्त्री के दूध से पृथक् सात वार

बुझावें। इससे मोती मूंगा तथा विविध वर्ण के पञ्च रत्न क्षण में विविध वर्ण हो भस्म होते हैं इसमें सन्देह नहीं ॥ ३६०-३६१ ॥

प्रवालमारणम्—

स्त्रीदुग्धेन प्रवालञ्च भावयित्वा तु खल्लके।
स्थापयेद्भाण्डिकामध्ये शरावेण निरोधयेत्।
चुल्ल्यामग्निप्रतापेन म्रियते प्रहरद्वये ॥ ३६२ ॥

स्त्रीदुग्धेनेति—अस्य शुद्धः पाठ एकपादश्च नासादितः। प्रवालञ्चेति—मृतस्य सागरीयजन्तु[1] विशेषस्य सुधासचणास्थि-एव प्रवालं नाम। तच्च-श्वेत, कृष्ण, मृत्तिकामलिन-रक्तभेदाच्चतुर्विधम्। अत्र—आगाररञ्जनक्रान्तं वक्रं सूक्ष्मं सकोटरम्।

रूक्षं कृष्णं लघु श्वेतं प्रवालमशुभं त्यजेत् ॥ आ. वे. प्र. ।१३-८७।
तेषु प्रायो भूमध्यसागरोद्भवं रक्तं पवित्रं रत्नेषु परिगण्यते।
यथा बालार्ककिरणारक्ता सागरसलिलोद्भवा लता याऽस्ति।
न त्यजति निजरुचिं निकषे घृष्टाऽपि सा स्मृता जात्या[2] ॥
आ. वे. प्र. । १३. ८८ ।

पक्वबिम्बीफलच्छायं वृत्तायतमवक्रकम्।
स्निग्धमव्रणकं स्थूलं प्रवालं सप्रधा शुभम्। र.इ.चू.१२.११.।
गुणाश्च— प्रवालं मधुरं साम्लं कफपित्तादिदोषनुत्।
वीर्यकान्तिकरं स्त्रीणां धृते मङ्गलदायकम् ॥ आ.वे.प्र.१३-८९ ॥

---

१. ANTHAZOANPOLYPS.

२. शशासृक्सिन्दूरपलाशपुष्पसदृशं क्रमेणोत्तमध्यमाधमं ज्ञेयम्। पारसीक समुद्रसङ्कटे (इरान की खाड़ी) कृष्ण प्रवालं भवति।

अपि च—क्षयपित्ताकासघ्नं दीपनं पाचनं लघु।
विषभूतादिशमनं विद्रुमं नेत्ररोगनुत् ॥ र.इ.चू. १२-१३ ॥
शुद्धं प्रवालं मसृणं चूर्णीकृत्य वारुणीयन्त्रान्निःसृतकरणीपुष्पलेनैकविंशतिवारभावितं प्रतिरात्रं च चन्द्रकिरणैराप्लुतं चन्द्रपुटीप्रवालं प्रवालपिष्टिर्वा नाम पित्तरोगेषु प्रशस्यते। द्विधा कुमारीरसेन पुटितं प्रवालभस्म कासे क्षये मधुमेहे च क्रमेण मधुना तण्डुलधावनेन विल्वपत्ररसेन युज्यते। जीर्णज्वरे च गुडूचीरसमधुना। कण्डूस्फोटत्रिचर्चिकादिषु पक्वकदलीफलेन पुष्टिकृद्रक्तप्रसादनमर्शःसु च हितम्। मा. १-२.र. ॥ ३६२ ॥

मूंगे को स्वरस में स्त्री के दूध की भावना दे चक्रिका बना शुष्क होने पर हांडी में रखे। हांड़ी के मुख को शराव द्वारा बन्द करके इस सम्पुट को तीव्र आग पर रखकर पकावे। दो पहर में मूंगा भस्म हो जाता है ॥ ३६२ ॥

कुलत्थस्य पलशतं वारिद्रोणेन पाचयेत्।
तस्मिन् पादावशेषे च क्वाथेऽष्टौ मणयः शिलाः ॥३६३
आतपे त्रिदिनं शोध्याः, क्वाथसिक्ताः पुनः पुनः।
शुध्यन्ते सर्वरत्नानि मणयश्च न संशयः ॥ ३६४ ॥

(इति मुक्तादिशोधनमारणम्)

सर्वरत्नानामेकरीत्या सरलशोधनमाह-कुलत्थस्येति-कुलत्थः=शिम्बीधान्यविशेषः कुलथी इत्याख्यः। पलशतं=सपादषट्प्रस्थं, वारिद्रोणेन-'द्विगुणं तद्द्रवार्द्रयोरिति' द्वात्रिंशत्प्रस्थजलेन, पादशेषेऽष्टप्रस्थशेषे, अष्टौ मणयः र. र. स. ४. २-४। तु.।